जातिनिर्माणे गङ्गादेव्याः योगदानम्

Dr. M.K.SUNEETHA,
Assistant Professor,
Directorate of Distance Education
National Sanskrit University, Tirupati.

[illegible], [illegible], आचार्यदेवो भव, अतिथिदेवो भव इति श्रुतिः सूचयति स्त्रियः प्राथम्यं, प्राधान्यञ्च [illegible] शिशोः जनने रक्षणे च स्त्रीणां योगदानम् अत्युत्कृष्टम् इति सत्यम् अनुभवसाक्षिकं सर्वेषां प्राणिनाम् ।

गृहिणी गृहमुच्यते इत्यपि सूक्तिः परिवारनिर्माणे, परिवारपोषणे च स्त्रीणाम् उत्तरदायित्वं [illegible] ।

शिवश्शक्त्या युक्तो यदि भवति शक्तः प्रभवि[illegible]

न चेदेवं देवो न खलु कुशलः स्पन्दितुमपि ।। (सौ.ल.I)

इत्यपि आदिशङ्कराचार्याणाम् उक्तिः समस्तस्यापि विश्वस्य सृष्ट्यादिषु कर्मसु स्त्रीरूपायाः शक्तेः औन्नत्यं स्पष्टं प्रतिपादयति । एतेन अवगम्यते यत् स्त्री एव सर्वस्यापि विजये सर्वाङ्गीणां [illegible] ।

साधारणानामेव स्त्रीणां बुद्धिषु बहुविधं कौशल्यं दरीदृश्यते । यदि सा स्त्री संस्कृताध्ययनसुसंस्कृता तर्हि सा न केवलं स्वीयं गृहं प्रत्युत समग्रमपि समाजम् उन्नमयति । '[illegible] इति महाकाव्यस्य रचयित्री गङ्गादेवी तादृश स्त्रीषु अग्रगण्या ।

गङ्गादेवी मधुराविजयस्य नवसर्गात्मकस्य महाकाव्यस्य रचयित्री । इयं गङ्गादेवी स्वभर्तुः वीरकल्परायस्य चरितं विजयाधिकं च आश्रित्य मधुराविजयम् इति नाम्ना प्रतिभापूर्णं प्रबन्धम् इमं प्रणिनाय ।

पुरुषवद्योषितोऽपि कवयः [illegible], संस्कारोह्यात्मनि समवैति, न स्त्रैणं पौरुषं वा विभागमपेक्षते । श्रूयन्ते दृश्यन्ते च राजपुत्र्यो महामात्यदुहतरो गणिकाः कौतुकिभार्याश्च शास्त्रप्रचोदितबुद्धयः कवयश्च [illegible] ।

काव्यमीमांसावचनं सूचयति यत् '**पुरुषवत् योषितोऽपि** [illegible]' [illegible] पुरुषाणाम् इव स्त्रीणां यद्यपि काव्यकृतयः अधिकाः न वर्तन्ते तथापि विद्यमानासु इयं कृतिः अत्युत्तमा ।

एवमेतस्याः कवयित्र्यास्समनन्तरं प्रवृत्तापि काव्यकला नैतत्काव्यश्रीरिव रसमयी, नैवाप्यर्थगम्भीरा, न च[illegible], नखल्वपि च विद्वज्जनरञ्जिनी । अतस्समुपलभ्यमानायां

स्त्रैणकाव्यशाखायां सांस्कृत्यां कालतोगुणतश्च प्रथमं स्थानमधिगच्छतीदं काव्यमिति निश्चप्रचम् इति मधुराविजयस्य व्याख्यातुः पोतुपुच्छि सुब्रह्मण्य शास्त्रिणाम् अभिप्रायः एव अत्र प्रमाणम् ।

मधुराविजयस्य कत्री गङ्[illegible] -[illegible] मध्ये आसीदिति निर्धार्यते । इयं महाकवयित्री काकतीयवंशजा राजकुमारी इत्यनुमीय [illegible] चतुर्दशशतके हंपी विजयनगरसाम्राज्य परिपालकः वीरकम्परायः आर्स [illegible] तस्यैव इयं [illegible], स्वपत्युः विजयगाथां तुरुष्काधीनविद्यमानायाः मधुरायाः जयरूपां कृतिं प्रणिनाय ।

काव्येस्मिन् नवसर्गात्मके रचयित्री गङ्गादेवी पूर्वं विद्यमानानां महाकवीनां प्रभावप्रेरिता तत्तत् काव्यच्छायानां प्रभावं प्रदर्शयति, प्राक्तनानां महाकवीनाम् अभिप्रायान् अतिशेतुं प्रयतते । यथा -

तं सन्तः श्रोतुमर्हन्ति सदसयक्ति हेतवः ।

हेम्नः संलक्ष्यते ह्यग्नौ विशुद्दिः श्यामिकापि वा ।। इति र[illegible]10

[illegible] कालिदासीयं श्लोकं स्मरन्ती इव अधोनिर्दिष्टं श्लोकं लिखितवती ।

न प्रार्थनीयस्तत्काव्यश्रुत्यै सहृदयो जनः ।

स्वादुपुष्परसास्वादे कः प्रेरयति षट्पदम् ।। इति

अत्र कवयित्र्या सूच्यते यत् सहृदयाः स्वयमेव काव्यरसास्वादाय प्रेरिताः भवेयुः । स्वयं प्रेरिताः सहृदयाः एव काव्ये विद्यमानानि अनर्घरत्नानि प्राप्तुं शक्नुयुः इति तस्याः अभिप्रायः । ननु उच्यते '**न रत्नमन्विष्यति मृग्यते हि तत्**' एवं भारवेः किरातार्जुनीयकर्तुः -

अंशुपाणिभिरतीव पिपासुः पद्मजं मधु भृशं रसयित्वा ।

क्षीबतामिव गतः क्षितिमेष्यन् लोहितं वपुरुवाह पतङ्गः ।। 9.2

इति अभिप्रायं परामृशन्ती इव -

कमलोदरसंभृतं करैर्मधु पीत्वा रविरुज्झिताम्बरः ।

स्पृशति स्म दिसं प्रचेतसो न मदः कस्य विकारकारणम् । [illegible]

एवम् अन्येषाम् अपि कवीनां रचनाभिः प्रभाविता इयं स्वीयां कृतिम् उत्कृष्टतरां कर्तुं प्रायतत । महाकवयित्री इयं गङ्गादेवी सामाजिकस्पृहा परिपूता इति अवगम्यते । मत्तगजाः इव दुर्जनाः सदुपदेशं न गृह्णन्ति इति मनुते । मुहुः प्रसर्पन्मदमीलितेक्षणाः क्षणाधिरोहद्रजसो मलीमसाः ।

गजा इव स्तम्भनिरुद्धचेतसः ।

खला न गृहन्ति नियन्तृचोदितम् ।। मधु[illegible]

मदान्धकारो हि महानिशीथिनी

प्रबोधचन्द्रप्रतिरोधकालिका ।

मनोजमत्तद्विपवैजयन्तिका

शरीरिणां शश्वदलविनी दशा ।। मधु□.□□

एतयोः श्लोकयोः परिशीलनेन इदम् अवश्यम् अवगम्यते यत् समाजस्य हानिकारः अविनयः समाजात् निर्मूलनीयः इति। तेनैव समाजश्रेयः भवतीति ।

यौवनं धनसम्पत्तिः इति वाक्यं मनसि निधाय कवयित्री इयम् -]

समग्रतारुण्यमदस्य सम्पदा

स्खलदुगतेर्यन्मदिरानिषेवणम् ।

स एष दोषत्रयजे महाज्वरे

ग्रहा□भूतस्य भुजङ्गनिग्रहः ।। म□.□□ □□□

बाणभट्टस्य शुकनासोपदेशम् अनुसरन्ती इव गङ्गादेवी स्वमधुराविजये बुक्कभूपतेः उपदेशं □□□□□□ ।

समाजश्रेयसे अर्थस्य उपयोगिताम् अवगत्य तस्य अर्थस्य अपात्रेषु विनियोगः समाजस्य हानये □□□□ □□ □□□□ अधोनिर्दिष्टेन श्लोकेन –

मदादपात्रेषु ददाति मन्दधी-

र्धनानि धर्माधिकसाधनानि यः ।

निपात्यते तेन मखक्रियोचितं

हविश्रितासद्मनि कृष्णवर्त्मनि ।। □□ □□□.□□

यथोक्तं पूर्वं कादम्बर्यां शुकनासोपदेशस्य प्रभावः प्रबन्धेस्मिन् सुष्ठु उपलभ्यते । कादम्बर्यां शुकनासः चन्द्रापीडस्य गुरुः यौवराज्याभिषेकाय सिद्धं चन्द्रापीडम् उद्धिश्य अत्यद्भुतं उपदेशं ददाति। यस्य च उपदेशस्य श्रवणेन च वैंपि युवा उन्नतनागरिकः भूत्वा समाज सुष्टुनिर्माति । मानवव्यक्तित्वनिर्माणे, मानवव्यक्तित्वविकासे च शुकनासोपदेशः यथा अत्युत्तमा रचना तथैव गङ्गादेव्याः रचनायां बुक्कभूपतेः उपदेशोऽपि अत्युत्तमः इति वक्तुं शक्यते । अभिप्रायश्च अयं अधोनिर्दिष्टश्लोकेन सुदृढो भवति ।

भवादृशास्तु स्वत एव शुद्धया

गुरूपदेशैर्गुणितप्रकाशया ।

धिया निरस्तव्यसनानुबन्धया

विलोक्य कार्याणि वि[illegible]

महर्षेः वाल्मीकेः आर्षेयाकृतिः रामायणं **धर्मविग्रहं रामं** नायककृत्व लोकश्रेयसे निर्मितम् । यत् च बहूनि युगानि अतीत्यापि सर्वकालीनं ज्ञानं ददत् राराजते । वेदसम्मितस्य रामायणस्य कथाक्रमः काव्येस्मिन् सुस्पष्टं अनुश्रुतः दरीदृश्यते । कम्परायस्य पिता बुक्करायः दशरथतुल्य इव मन्यते [illegible] तत्सुतो कम्परायः श्रीरामतुल्यः ।

एवं लङ्काधिपतिः लोककण्ठकः रावण इव मधुराधिपतिः तुरुष्कः प्रतिनायकः, यस्य वधात् [illegible] निष्कण्ठका समजनि ।

एवं परिशीलनेन एतदवगम्यते [illegible] यत् रामायणस्य छायायाम् एव मधुराविजयंकाव्यं विरचितम् [illegible] रामायणमिव एतस्यापि उदात्तचरित्रनिर्माणं, लोकश्रेयः, धर्मस्थापनं इत्यादीनि प्रयोजनानि ।

का त्वं शुभे कस्य परिग्रहो वा किं वा मदभ्यागम कारणं ते ?

आचक्ष्व मत्वा वशिनां रघूणां मनः परस्त्रीविमुखप्रवृत्तिः ।। इति रघु.१[illegible]

इति यद्वृत्तं रघुवंशे कालिदासेन वर्णितं तत्समानमेववृत्तं मधुराविजयेपि चित्रितम् । मधुराविजये मधुराधिदेवता कम्परायस्य स्वप्ने प्रत्यक्षीभूय लोककण्ठकात् तुरुष्कात् मधुरामोचनीया इति प्रार्थयते । वर्णनमिदम्_अयोध्यापुरीं रक्षतु इति अयोध्यापुराधिदेवतायाः प्रार्थना छायारूपा एव । अतः मधुराविजयं काव्यं चारित्र्यदृष्ट्या वा काव्यदृष्ट्या वा समाजनिर्माणदृष्ट्या वा विशिष्ट स्थानं प्राप्नोति ।

कल्याणाय सतां भूयाद् देवो दन्तावलालनः ।

[illegible]**गतसङ्कल्प कल्पनाकल्पपादयः ।।** [illegible]

नान्दीश्लोकोऽपि विषयममुं द्रढीकरोति ।

तथा च काव्यमिद[illegible][अशेषमहाकाव्यस्वर्णखण्डान् विद्राव्य सम्यगवकृष्टया स्वर्णलतिकया ऋज्व्या विधाय स्वशिल्पकलानैपुणीमनितरसाधारणी प्रदर्शयत् शिल्पिवतंसेन केनचिदुपायेन भाषादेव्यै समर्पितमेकमनधैं महाभूषणमद्वितीयमिति मन्यामहे । अ[illegible] स्त्रीमूर्तिरिति प्रकटयितुं शक्यते ।

****

श्रीमद्भागवते दशलक्षणे भक्तिरसः

अञ्जिता साहु
शोधच्छात्रा[illegible] ,
[illegible]तिरुपतिः ,विद्यापीठम्.सं[illegible]
anjitasahoo22@gmail.com

[illegible]

प्राणीमात्रं सुखम् अभिलषति । कोऽपि दुःखं न इच्छति ।सर्वे अधिकाधिकतया सुखस्य अन्वेषणं कुर्वन्ति । अल्पसुखेन कस्यापि सन्तोषः न भवति । अपि छान्दोग्योपनिषदि लिखितमस्ति**नाल्पे सुखम्" - अस्ति भूमौ वा सुखम्** "[1] [illegible] तदेव परमं सुखं मनुष्यः भगवत्प्राप्तितः प्राप्तुम् अर्हति । भगवत्प्राप्तिः भगवतः आराधनया भक्त्या च लभ्यते । अ[illegible] परमसुखप्राप्तिः नाम भगवत्प्राप्तिः । अर्थात् भक्तिरेव परमसाधनभूता भवति धर्मार्थकाम-मोक्षादयोऽपि भगवतः कृपातः लभ्यन्ते । तदर्थमपि भगवच्छक्तेः आवश्यकता वरीवर्ति । अत[illegible] भक्तिविषये तस्याः स्वरूपविषये च किञ्चित् आलोचयामः ।

भक्तिशब्दस्य निर्वचनम् एवं भक्तितत्त्वनिरूपणम्

भक्तिः नाम का [illegible] - इति जिज्ञासायामुच्यते ? तस्याः लक्षणं किम् ? प्रत्यययोगे भक्तिः इति शब्दः निष्पन्नो भवति "क्तिन्" इति सूत्रानुसारं " स्त्रियां क्तिन्" ध[illegible] वस्तुतः प्रत्ययः भावार्थे प्रयुज्यते "क्तिन्" । अतः भजनं भक्तिरिति ।

भजनं भक्तिः भज्यते अनया इति भक्तिःशब्दस्य भजन्ति अनया इति वा भक्तिः इति भक्ति, व्युत्पत्तिः भवति । भजनशब्दे प्रत्ययः निष्ठाप्रत्ययः इति मन्यते "ल्युट्" [illegible] "क्तिन्" [illegible] तदर्थं व्यङ्ग्यार्थे सेवायां निष्ठा भवति भक्तिः । भक्तिशब्दस्य वास्तविकार्थः भवति सेवा । गरुडपुराणे उक्तमस्ति यत्"**तस्मात् सेवा बुधैः प्रोक्ता साधनभूयसी"** -[2] इति । एतदर्थं बुद्धिमान् व्यक्तिः वदति सेवा हि भक्तिः । पुराणे भक्तानां भक्तीनाञ्च भेदोपभेदाः भिन्नभिन्नप्रकारकाः परिलक्ष्यन्ते । भक्तिं विना किमपि मनोरथं न सिद्ध्यति ।

---

[1] छान्दोग्योपनिषद्

[2] [illegible]3/219.[illegible]

रामानुजाचार्यैः गीताभाष्ये उक्तमस्ति यत्**पाण्डुतनययुद्धप्रोत्साहनव्याजेन "-र्थलक्षणमोक्षसाधनं तथा वेदान्तोदितं स्वविषयं ज्ञानकर्मानुगृहीतं भक्तियोगं परमपुरुषा "**□□□□□□□□□□□□□□□[1] □□□ □ अर्थात् भगवान् स्वभक्तानां भजनं करोतिभक्ताः भगवन्तं प्रति , च भक्तिं समर्पयन्ति ।□□□□" **ा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्"**[2]**न मे भक्त " , "प्रणश्यति**[3] इति वचनेन भगवान् स्वयं भक्तानाम् उत्तरदायित्त्वं स्वीकरोति इति विज्ञायते ।

भज् सेवायाम् इति धातोः क्तिन् प्रत्यये भक्तिशब्दः निष्पन्नत्वात् भगवत्सेवा एव भक्तिः इति निगद्यते । भगवत्प्राप्तये ये अन्योपायाः सन्ति तपते सर्वथा मनुष्याणां कृते ,योग□□□□-कर्म-ज्ञान-सुलभाः न भवन्ति □ परं भक्तिरेव मनुष्याणां कृते सुलभा फलप्रदा च भवति । यथा पद्मपुराणोक्त भागवतमाहात्मे उच्यते -

न तपोभिः न वेदैश्च न ज्ञानेन न कर्मणा ।
हरिर्हि साध्यते भक्त्या प्रमाणं तत्र गोपिभिः ।।[4]

भगवद्गीतायामपि श्रीकृष्णः अवदत्- □

तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः।
कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन ।।
योगिनामपि सर्वेषां मद्गतेनान्तरात्मना ।
श्रद्धावान्भजते यो मां स मे युक्ततमो मतः ।[5]

एभिः श्लोकैः ज्ञायते यत् कर्मयोगेभ्योऽपि सर्वश्रेष्ठासर्वसुकराफलप्रदा च भवति -ज्ञान-भक्तिः □ भक्त्या यथा भगवान् तुष्यति न तथा अन्येन उपायेन भगवान् तुष्टो भवति । भगवान् मनुष्याणां जातिकेवलं भक्त्या वा प्रीत्या वा तुष ,तपोदानादिकं न पश्यति-विद्या-व□□-□□□-ो□□□ □ यथोक्तम्-

व्याधस्य चरणं ध्रुवस्य च वयः विद्या गजेन्द्रस्य का
□□ □□□□विंदुरस्य यादवपते उग्रस्य किं पौरुषम् ।
कुब्जायाः किमु नाम रूपमधिकं किं तत्सुदाम्नो धनं
भक्त्या तुष्यति केवलं न च □□र्भक्तिप्रियो म□□□□ □□[1]

1 रामानुज गीताभाष्ये पृ.12
2 □.□□.4/11
3 □.□□.9/31
4 पद्मपुराणोक्त भागवतमाहात्म्य18/2-
5 □.□□.6/46-47

श्रीमद्भागवते भक्तिरसस्य समन्वयः

श्रीमद्भागवतमहापुराणं भवति भक्तेः महान् ग्रन्थः । भगवन्तं प्रति भक्तिः भवति जीवनस्य □□□□□ ,अहैतुकी भक्तिः ,तदेव मनुजस्य परमधर्मः ,आत्यन्तिककल्याणं ,परमपुरुषार्थप्राप्तिः , अप्रतिहता भक्तिः च भवति ,निष्कामभक्तिः । परमधर्मः भागवताकारः कथयति-

अकामः सर्वकामो वा मोक्षकाम उदारधीः ।
तीव्रेण भक्तियोगेन यजेत पुरुषः परम् ।।[2]

भगवतः श्रीकृष्णस्य वात्सल्यतामाधुर्यं भावपूर्णाभिव्यक्तिः इत्यादयः मिलित्वा ,मधुररूपं , भगवतम् एको रससिक्त भक्तिग्रन्थः इति सिध्यति ।

भक्तिशास्त्रस्य सर्वस्वं भागवतपुराणं भवति । कथ्यते एतद् निगमकल्पतरोः स्वयं गलितं □□□□□ । यत् शुकदेवेन स्वमधुरवाण्यां संयुक्तं कृत्वा अमृतमयं कृतवान् ।

निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतम् ।
पिबत भागवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः ।।[3]

श्रीमद्भागवते काव्यभक्ति-अख्यान-समन्वितं ज्ञानं वर्तते □ अत्र समस्तमनुष्याणां कल्याणार्थं प्रेरकः भवति भक्तिसमन्वयः । समन्वयः इत्युक्ते अर्थात् मेलः"□□□□□□□□" □ भक्तिः कस्यापि विरोधं न करोति । कारणम् एतस्यार्थे श्रद्धामयप्रेम एव कारणं भवति । अतः यत्र भक्तिः विद्यते तत्र श्रद्धाप ,□□□ सदाचारश्च विद्यते ,सद्गुणः ,निर्मलत्वं , । एते यत्र विद्यन्ते तत्र व्यक्तिः स्वयं क इति विस्मरति । केवलं स्वप्रभुं भजति तेन र□□□□□□□□□□□ □□□ , □ तदा समन्वयः आयाति □□□□□ □ सः स्वतन्त्रः भवितुं न इच्छति । कामना तस्य स्पर्शं न करोति ।

यदा भक्तः भक्तिं प्राप्नोति एवमन्यं किमपि न इच्छति तदा स भगवति परमप्रेम प्राप्नोति । तस्य मनसि अन्यत् किमपि प्राप्तुम् आशा न आयाति । जगतः प्रेम ,ब□□,सौन्दर्यं ,□□□ ,ऐश्वर्यं , नीरसम् इति च मन्यते ,यशः प्रभृतयः समस्तवस्तूनि तदा तुच्छं । यदा भक्तिः आयाति तदा भक्तः सर्वविपत्तीनां सहनं कृत्वापि सुखं प्राप्नोति । तस्य कृते सर्वम् अनुकूलं भवति ।

दशलक्षणे भक्तिरसस्य अन्विर्तिः

परमात्मनः उपलब्धिर्भवति वास्तविकध्येयसर्वस्वम् । सर्गविसर्गादिलक्षणे एतस्य ज्ञानं प्राप्यते । एतद् दशलक्षणं पुराणस्य सामान्यलक्षणं न भवतिपरन्तु पुराणमूर्धन्यभूतस्य , श्रीमद्भागवतस्य स्वलक्षणम् । भागवतधर्मस्य विवेचनं श्रीमद्भागवतस्य आद्यः प्रधानः हेतुर्वा भवति।

---

1 श्रीमद्भागवतम्
2 □□.□□1/1/12
3 □□3/1/1.□□

एतस्य प्रथमतः नव लक्षणं भवति । ईश्वरस्वरूपस्य परिज्ञानं वा विवेचनस्य कारणम् । तदर्थं भागवतकारस्य उक्तिः भवति **"दशमस्य विशुद्ध्यर्थं नवमानां हि लक्षणम्"** -[1]इति ।

अत्र परमात्मनः जीवस्य च परस्परसम्बन्धं दृष्ट्वा एतेषां तत्त्वानां प्रतिपादनं भागवते विरचितमस्ति । भगवतः कृत्यं भवति सर्गःविसर्गः पोषणञ्च ,नि ,स्थितिः , ।तद्वत् उत्पत्तिः , अनुग्रहः एते भागवतप्रतिनिधयः इति ज्ञायन्ते ,निग्रहः ,लय ,स्थितिः ।

चराचरजगत् प्राणभूतः परमात्मा एव । पञ्चभूत ,इन्द्रियाणां ,शब्दादि तन्मात्राणां-महत्तत्त्वस्य च उत्पत्तिं स एव कृतवान् ,अहङ्कारस्य [एवंरूपेण तत्त्वानां जीवानाम् उत्पत्त ,ि ो

भागवतस्वरूपं भवति पार्यन्तिकतात्पर्यम् । एतदर्थं सर्गविसर्गस्य ज्ञानं स एव भवति एतेन ज्ञानेन विना भक्तिः न सम्भवति । असत्यरूपजगति सत्यभूतः भवति भगवत्सत्ता । एतस्य कारणे सत्यस्य असत्यस्य च कल्पनाशक्तिः आगच [नानाऽवस्थायां तामेव अनुव्याप्तिं स्थानरुपसिद्धत्वेन कल्पयन्ति । अतः परमात्मनः माहात्म्यज्ञानेन भगवति शक्तिः आगच्छति । पोषणे भागवत्कृपायाः वर्णनं दृश्यते । जीवानां मुक्तिः भवति ।परमसुखञ्च प्राप्यते ।

भागवते भगवतः अनुग्रहकथा वर्णिता दृश्यते । तत्पठनेन जीवाः भगवदभिमुखाः भवन्ति। एवञ्च भगवत्तत्त्वस्य प्राप्तिं कुर्वन्ति । जीवानां संसारकर्मबन्धनात् निग्रहणम् ऊतिः कारयति । ऊतिः नाम कर्मवासना । कर्मवासनात् निवृत्तिः भवति मुक्तिः । दशलक्षणे कर्मवासनायाः निरुपणं , कर्मवासनात् विमुक्तिः भवति भक्तिरसस्य अन्वितिः । अर्थात् भक्तेः उत्पत्तिः कर्मवासनायाः विसर्गस्य च कारणभूता भवति ।

मन्वन्तरं कालविशेषगणना इति कथ्यते ।मन्वन्तरे मनुष्याणां भगवत्प्राप्तिः ,साधनप्रणाली , धर्मभाबना इत्यादीनां निर्देशोऽस्ति । वयं स्वरुच्यनुसारं सुमार्गस्य ग्रहणं कृत्वा संसारे विमुक्तिमार्गं प्राप्तुं शक्नुमः ।

संसारात् विमुक्ति मार्गः भवति ईशानुकथा वा भगवशक्तिः-] भगवतः चरित्रश्रवणं ,कीर्तनं , मननं कृत्वा यः प्रीतिं प्राप्नोति तस्य कृते परमपुरुषार्थसाधनं भवति । यतोहि भक्तिरसस्य अन्वितिः आगन्तुं शक्नोति । भगवन्तं प्रति प्रीतिः निरोधभावनातः आयाति । निरोधार्थं विषयवासनातः मुक्तिः भवितव्या ।

[1] .2/10/2

भागवतमतानुसारेण वास्तविकपर्यवसानं भगवत्कथाश्रवणं, मननं, अनुध्यानम् एतानि भगवन्तं प्रति अनुरागयुतान् कुर्वन्ति । एतदर्थं सम्यग्रूपेण जीवस्य जाग्रत्सुसुप्तिं विहाय -स्वप्न- तुर्येऽवस्थायां परमात्मनः अवस्थितिः सिद्धा भव सः भक्तानां कल्याणार्थं विभिन्नरूपेण आविर्भूतः सन् लीलामाध्यमेन तेभ्यः मुक्तिं प्रयच्छति । एवंरूपेण भगवतः लीलाकथामाहात्म्यं मुक्तिसाधनम् इति कथ्यते ।

श्रीमद्भागवते दशमस्कन्धे मुख्यतया निरोधपदेन स्वीकृता अस्ति "" अर्थात् आनुषङ्गिकरूपेण धर्मालापकानाम् असुराणां दुष्टनरेशाणां भगवतः लीलामाध्यमेन वधः भवति तत् निरोधः इत्युच्यते । अत्र मुक्तस्य तात्पर्यं भवति अभेदरूपत्वात् नानात्वस्य परित्यागःतथा , जीवस्वरूपात्मनि सुहृद् निष्ठायाः प्राप्तिः । इति "अत्र गायन्ति भक्त्या मुक्तिः आयाति" ।

आश्रयो भवति भागवतस्य दशमलक्षणम् । एतस्य साधारणार्थः भवति शरणंसमर्पणञ्च , एतस्य विशुद्धयर्थम् उपर्युक्तनवलक्षणानां विवेचनम् अभवत् । यः तेषां श कल्याणम् प्राप्नोति । भक्तिं विना आश्रयरूपपरब्रह्मणः प्राप्तिः असम्भवम् ।

श्रीमद्भागवते आश्रयग्रहणस्य समर्पणभावस्य वा प्रेरणा अधिकतया दृश्यते । तेषां स्मरणं विना जीवस्य कल्याणम् असम्भवम् । आश्रयमाध्यमेन सर्वं कुशलं भवति । बन्धनात् मुक्तिः स एव सम्पूर्णजगतः मूलाधारः वास्तविकाधारश्च । तदर्थं श्रीमद्भागवते वर्णितमस्ति यत् **स आश्रयः प" -रं ब्रह्म परमात्मेति शब्द्यते"**[1] । परंब्रह्म परमात्मा हि वास्तविकाश्रयो भवति । यः शरणागतः भवति सः कदापि स्वपरिचयम् **"अहं शरणागत अस्मि"** अत्र वास्तविकः आश्रयः स एव परमात्मा रक्षक इति चिन्तनीयम् । भागवते वर्णितमस्ति यत् - **विश्वस्य यः"स्थितिलयोद्भवहेतुराद्यः"**[2]इति

कार्यस्य आधारो भवति कारणम् । उदाह्रियते यथा पार्थिवजगतः आधारभूता भवति – , तद्वत् जलस्य तेजः ,पृथ्व्याः आधारः भवति जलं ,पृथ्वी इतःपरम् आकाशस्य परमः आधारः महाकाशः परन्तु चेतनः , , न तु निराशः परन्तु आनन्दः सन् भवति एतेन सूत्रबलेन भगवतः व्यासस्य अभिप्रायः "आनन्दमयोऽभ्यासात्" अत्रागम्यते

1 7/10/2.

2 37/16/3.

एवंरूपेण परमात्मा भवति चराचरजगतः परमाधारः [illegible] मृत्तिकातः सृष्टः तस्य विकारः घटः मृत्तिकायाः भिन्नः न भवतितद्वत् जगदिदं , परमात्मनः [illegible]

[illegible] पूर्णनिर्भरता च भवति श्रीमद्भागवतस्य सन्देशः ,भगवति विश्वासः , [illegible] अनेन माध्यमेन भगवतः भक्तिः सुलभा भवति । अनेन भगवत्तत्त्वस्य अनुभूतिः जायते , सांसारिकविषयाणाम् आसक्तिः निर्गच्छति । एतेषां विषये दशलक्षणे भक्तिरसस्य अन्वितिः इति तात्पर्यम् ।

अनेन प्रकारेण श्रीमद्भागवते भक्तेः यानि लक्षणानि स्वीकृतानि तानि अमुमेव सारं प्रतिपादयन्ति यत् परमात्मनि अनन्यसाधारणप्रेमैव भक्तिरित्युच्यते । एवंप्रकारेण **श्रीमद्भागवते दशलक्षणे भक्तिरस**स्य वर्णनं परिदृश्यते ।

--- सन्दर्भग्रन्थसूची ---

.1**श्रीमद्भगवद्गीता,** गोर[illegible]गीताप्रेस् , ।

.2**गरुडपुराणम्,** चौखम्बा कृष्णदास अकादमी 2015 ,[illegible] , [illegible]

.3**श्रीमद्भागवतमहापुराणम्** ,चौखम्बा संस्कृत प्रतिष्ठान 2113 ,दिल्ली , ।

--------- 0 ----------

लोकमान्यालङ्कारे अलङ्कारप्रतिपादनवैशिष्ट्यम्

- रत्नमोहनझाः
सहायकाचार्यः, दूरस्थशिक्षा
राष्ट्रियसंस्कृतसंस्थानम्, नवदे

वेदकालादारभ्य साहित्यविकासयात्रयाम् अलङ्कारस्य मधुरः सन्निवेशः दृश्यते । वैदिकसंहितासु अनेकेषु स्थलेषु अलङ्कारस्य मनोरमः प्रयोगः वर्तते । एवमेव लौकिकसाहित्येऽपि रविधानम् अद्भुतं दृश

लोकः शास्त्रञ्च परस्परमुकारकं विद्यते । क्वचिल्लोकः शास्त्र, क्वचिच्च शास्त्रं लोकमुद्धरति एतादृशचित्रनिरूपणे अल अत्यन्तमुपकारकाः भव वाल्मीकिः सुन्दरकाण्डे सीतायाः वर्णनप्रसङ्गे लोकशास्त्रयोः अत्यन्तं समन्वितं बिम्बं समुपस्थापयति-

सा प्रकृत्यैव तन्वन्ती तद्वियोगाच्च कर्षिता ।
प्रतिपत्पाठशीलस्य विद्येव तनुतां गता ॥[1]

तस्य रावणस्य स्वरूपं वैभवं च अत्यन्तं नयनाभिरामं वर्तते, परन्तु तत्क्षणमेव कविः तस्य भीषणतामपि प्रकटयति । अत्र अल रस्य माहात्म्येन चित्रमिदमतीव स्पष्टतामादधाति -

स कल्पवृक्षप्रतिमो वसन्त इव मूर्त्तिमान् ।
श्मशानचैत्यप्रतिमो भूषितोऽपि भ[2]

तः प्रत्यागत्य हनूमान् रामचन्द्राय यदा चूडामणिं प्रायच्छत् तदा तद् विलोक्य सीतावृत्तान्तमुपलभ्य च मर्यादापुरुषोत्तमः श्रीरामः सर्वेषां पुरत एव सीतायाः कृते । तद्वर्णनप्रसङ्गे आदिकविः रमणीयं मार्मिकं च दृष्टान्तमुपस्थापयति -

यथैव धेनुः स्रवति स्नेहाद् वत्सस्य वत्सला ।
तथा ममापि हृदयं मणिश्रे"स्य दर्शनात् ॥[3]

इदृशानि असङ्ख्यानि उदाहरणानि वर्तन्ते अलङ्काराणां सहजसन्निवेशस्य तस्मादेव आचार्यैः काव्यस्यात्मतत्त्वत्वेन अलङ्क 'काव्यं ग्राह्यम'[4] 'सौन्दर्यमलङ्का'[5]

भरताचार्येण अलङ्रस्य चत्वारो भेदाः कृताः पुनश्च कालान्तरेण जयदेवेन शतं प्रकाराः प्रदर्शिताः - 'इत्थं शतमलङ्राः लक्षयित्वा निदर्शिताः'[6]

भरताचार्यादारभ्य विश्वेश्वरपाण्डेयं यावदनुस्यूततया अलङ्कारतत्त्वानां सुव्यवस्थितं ञ्जार रस्येयं धारा वर्तमानकालेऽपि पण्डितप्रवरेण करमलकरमहोदयेन प्रवाहिता वर्तते संस्कृतसाहित्ये मन्ये प्रथमतया अनेनैव कस्यचित् व्यक्तिविशेषस्य जीवनचरितमाधारीकृत्य सर्वेषामलङ्काराणामेकत्र निरूपणं विहितम्। अस्य रचनाकौशलप्रदर्शनात् प्रागत्र संक्षेपेण जीवनपरिचयः प्रस्तूयते।

करमलकरमहोदयस्य मूलस्थानं महाराष्ट्रराज्यस्य रत्नागिरिमण्डलस्य राजापुरमाख्यं नगरं वर्तते। अस्य प्रपितामहः पण्डितदामोदरभट्टः अर्चकत्वेन इन्दौरनगरं समायातः। पश्चाच्च सः तत्रैव न्यवसत् भारद्वाजगोत्रेत्पन्नस्यास्य पौत्रः रामचन्द्रोपाध्यायः पौत्रवधू च जानकी देवी आस्ताम्। अनयोः पुत्रः गजाननशास्त्री महानाल रिकः अभूत् गजाननवर्यः 1952 तमे वैक्रमाब्दे भाद्रमासकृष्णपक्षे अष्टम्यां तिथौ इन्दौरनगरे जनिम् अलभत। चैत्रकृष्णचतुर्दश्यां 2032 त वैक्रमाब्दे च सः दिव्यलोकं प्राप्नोत्।

इन्दौरस्थे संस्कृतमहाविद्यालये शिक्षामवाप्य असौ तस्मिन्नेव महाविद्यालये प्राध्यापकत्वेन नियुक्तिमलभत। तत्र द्वात्रिंशद्वर्षाणि यावदध्यापनमकरोत्। वृत्त्या यद्यपि अयं साघ्व्ययोगस्याध्यापकः आसीत् परन्तु संस्कृतसाहित्ये अपि अतीव रुचिमान् आसीत्। एतदतिरिच्य शास्त्रिवर्यः काव्यशास्त्रस्य वेदान्तशास्त्रस्य च प्रगल्भविद्वान् आसीत्।

श्रीमान् गजाननरामचन्द्रकरमलकरः कौलिकपरम्परया कवित्वं प्राप्नोत्। "सः यथा साहित्यनिर्माणे निपुणः आसीत् तथैव सङ्गीतविद्यायां पाककर्मणि काष्ठवस्तुनिर्माणे चापि दक्षः समग्रे पर्यटनं विधाय विभिन्नलोकसंस्कृतिमवगाह्य स्वीयां रचनां पर्यपोषयत्। तस्य पुत्रस्य कवेः भास्करगजाननकरमलकरस्य दृष्टौ सः मनसा साहित्यकारः, हृदयेन , स्वभावेन धार्मिकः, हस्ताभ्यां विश्वकर्मा, पद्भ्यां पर्यटकः, ज्ञानेन दार्शनिकः, कर्मणा महान् देशभक्तश्चासीत्।"[7]

महान् राजनेता लोकमान्यतिलकः अस्य अतीव प्रियः आसीत्। तिलकमहाशयस्य चरितमाधृत्य जयदेवप्रणीते चन्द्रालोके निरूपितानामलङ्काराण पण्डितगजाननशास्त्रिवर्य अभिनवं विलक्षणं ग्रन्थं व्यरचयत्। तस्य नामकरणमपि तिलकनाम्ना एव

[illegible]''लोकमान्यालङ्[illegible]'' [illegible] अस्य अपरा रचना वर्तते -''पद्यपद्माकरः'' । तत्र अनेकाः स्फुटरचनाः वर्तन्ते ।

[illegible], [illegible] [illegible], तिलके भक्ति , राष्ट्रसेवाभावश्चास्मिन् लोकमान्यालङ्[illegible]रे विशेषतया द्रष्टुं शक्यते । ग्रन्थेऽस्मिन् लोकमान्यतिलकस्य जीवनवृत्तमाधृत्य शतस्य अलङ्[illegible]राणां शतम् उदाहरणानि सर्वथा विनूतनशैल्या पण्डितवर्येण प्रस्तुतानि ।

यद्यपि अल[illegible]राणां सघ्ख्याविषये आचार्येषु मतवैभिन्यं दृश्यते तथापि शब्दमाहात्म्येन अर्थमाहात्म्येन उभयविधमाहात्म्येन च अलङ्[illegible]राणां त्रैविध्यं सर्वैः अघ[illegible]ीक्रियते । शोधपत्रेऽस्मिन् लोकमान्यालङ्[illegible]रे वर्णितानां केषाञ्चन अर्थालङ्[illegible]राणाम् उपस्थापनं क्रियते । एतेषां सन्दर्शनेन स्थालीपुलाकन्यायेन ग्रन्थस्यास्य वैशिष्ट्यं ज्ञास्यते इति मन्ये ।

(1) अनन्वयालङ्कारस्य उदाहरणम्

[illegible]यं सादृश्यमूलकः । तत्र भेदाभेदप्रधाने अस्य गणना क्रियते । साहित्यदर्पणकारः आचार्यः विश्वनाथः कथयति-

''उपमानोपमेयत्वमेकस्यैव त्वनन्वयः ।''[8]

अनन्वयशब्दस्य व्युत्पत्या ज्ञायते यत् न विद्यते अन्वयः सम्बन्धः उपमानान्तरेण यत्र [illegible]नन्वयः । अर्थात् उपमानम् उपमेयञ्च एकमेव वस्तु स्यात् । तद्भिन्ने कस्मिंश्चिदपि वस्तूनि यदि तस्य सादृश्यं न स्यात् तर्हि अनन्वयालङ्कारः भवति । साहित्यदर्पणस्य मतानुसारेण ''एकस्यैव तु वर्णनीयस्य वस्तुन उपमानोपमेयत्वं युगपदेव उपमानत्वमुपमेयत्वं च कल्पित×चेत् तदा न विद्यते अन्वय उपमानान्तरेण सत्तासम्बन्धो यत्रेतिव्युत्पत्या अनन्वयो नामालङ्कारः स्या[illegible] । एतादृशव्युत्पत्तौ बीजन्तु उपमेयत्वं नाम उपमानन्नमित्वे सति उपमानगतसम्भाव्यमानानेकधर्मत्वम्, तेनोभयत्रप्युभयभेदस्यावश्यम्भावित्वादेकत्रैव वस्तुनि युगपदुपमानत्वोपमेयत्वयोः सत्तासम्बन्धोऽ-सम्भव एवेति ।''[9]

चन्द्रालोककारः अनन्वया[illegible]रस्य लक्षणोपस्थापनसन्दर्भे मनोरममुदाहरणमिदं प्रस्तौति-

उपमानोपमेयत्वं यदेकस्यैव वस्तुनः ।
इन्दुरिन्दुरिव श्रीमानित्यादौ तदनन्वयः ।।[10]

[illegible]रस्यास्य निदर्शनं लोकमान्यालङ्कारेण इत्थं कृतम्-

अनुपमसुखहेतुं निस्पृहेणैकगम्यम्
जगति कर्तुं धीमतामप्यशक्यम् ।
तनुधनहृदयैस्तद् राष्ट्रकार्यं सुकुर्वन्
! नूनं त्वत्समो भूस्त्वमेव । [11]

! अधिजगति अनुपमसुखहेतुं धीमतामपि यत् कर्तुमशक्यं भवति राष्ट्रकार्यं तनुधनहृदयैः सुकुर्वन् नूनं त्वत्समो त्वमेव अभूः । करमलकरमहोदयस्यानुसारेण अस्मिन् लोके राष्ट्रकार्यं सर्वतो विशिष्टं भवति । महान्तोऽपि जनाः विशेषप्रयत्नेनापि कार्यमिदं कर्तुं साफल्यं नैवाप्नुवन्ति परन्तु महत्त्वभूतं तत्कार्यं श्रीमान् तिलकः तनुधनहृदयैः अकरोत् । अत्र कविः तिलके यान् गुणान् यच्च सा अवलोकयति तदन्यत्र सुदुर्लभमेव । तस्मादुपमेयः तिलक एवोपमानस्याप्यस्थानमवाप्य अत्र उदाहरणेऽस्मिन् अनन्वयालङ्कारस्य विषयत्वेन तिष्ठति ।

(2) प्रतीपालङ्कारस्य उदाहरणम्

इदानीं प्रतीपालङ्कारस्य उदाहरणमेकं परिशील्यते । रस्यास्य गणन लोकन्यायमूलकालङ्कारे क्रियते काव्यप्रकाशकारः वाग्देवतावतारः मम्मटाचार्यः कथयति-

आक्षेप उपमानस्य प्रतीपमुपमेयता [12]

आचार्यः विश्वनाथोऽपि प्रतीपालङ्कारस्य द्वैविध्यमघ ञ्च प्रसिद्धोपमानस्य उपमेयत्वकल्पनेनैकः, उपमानस्य निष्फलत्वाभिधानेन द्वितीय इति प्रतिपादयति-

प्रसिद्धस्योपमानस्योपमेयत्वप्रकल्पनम् ।
निष्फलत्वाभिधानं वा प्रतीपमिति कथ्यते ।। [13]

चन्द्रालोककारस्य चिन्तनानुगुणम् उपमेयतः उपमेयादुपमानस्य हीनत्वं न्यूनत्वं प्रतीपमिति न्यूनगुणत्वमुपमेयत्वम्, अधिकगुणकैरुपमानैः न्यूनगुणकानांमुपमेयानां सादृश्यं प्रतिपाद्यते । यत्र तु प्रकृतस्यास्य नियमस्य व्याकोपो जायते तत्र तत्सादृश्यप्रतिपादनापेक्षया भिन्नस्यापरस्य कस्यचिच्चमत्कारस्य जायमानत्वात् भिन्न एवालङ्कारो भवति । प्रतीपमिति नियमव्याकोपे क्वचिच्चोपमानस्य नैरर्थक्यं कल्पते । तदुभयत्रपि प्रतीपमेवा

प्रतीपमुपमानस्य हीनत्वमुपमेयतः ।
दृष्टं चेद्वदनं तस्याः किं पद्मेन किमिन्दुना ।। [14]

इदं लक्षणमधिकृत्यैव लोकमान्यालङ्कारे उदाहरणं प्रस्तौति करमलकरवर्यः । सः इन्द्रस्य सुधर्मासभायाः रत्नभूतामुर्वशीं वर्णयति । लोकमान्यतिलकस्य वाणी सदृशी उर्वशी वर्तते । सा च वाणी यथा सदैव हृदयभावसंदर्शिका विवुधप्रिया, सदसि सर्वथा सलीलसुपदक्रमं नर्तकी, म□□□□□ पदध्वनिहृतश्रवा मनोहारिणी वर्तते तथैव स्वर्गता उर्वशी अपि विद्यते-

सदैव विवुधप्रिया हृदयभावसंदर्शिका
सलीलसुपदक्रमं सदसि नर्तकी सर्वथा।
पदध्वनिहृतश्रवा मतिमतां मनोहारिणी
त्वदुक्तिसदृशी चिरं जयति सोर्वशी स्वर्गता ॥[15]

अत्र प्रसिद्धस्योपमानोपमेयभावस्य प्रतिलोमत्वं दृश्यते । वस्तुतः उर्वशी सर्वत्र सुप्रसिद्धा वर्तते । तस्याम् उपमानधर्माः विद्यन्ते । परन्तु तद्विरुद्धमत्र गजाननवर्येण तिलकमहाशयस्योक्तिः उपमानत्वेन समुपस्थापिता । तस्मादत्र प्रतीपालङ्कारो वर्तते ।

(3) रूपकाल□□रस्य उदाहरणम्

सादृश्यमूलकालङ्□रे अभेदप्रधानाल□□रस्य भेदद्वयं वर्तते । तत्र आरोपमूलकाल□□□□ रूपकाल□□रः परिगण्यते । व्युत्पत्तिदृष्टड्ढा पश्यामश्चेत् ''रूप्यते इतरव्यावृत्ततया ज्ञाप्यते धर्मी अनेन इति रूपम्, तद्रूपम् अस्य असौ तद्रूपः, तस्य भावः-ताद्रूप्यम् चन्द्रकार्यकारित्वाद् विषयिणः उपमानस्य अ -ताद्रूप्याभ्यां विषयस्य उपमेयस्य यद् ञ्जन□□□ □ञ्जन□□□ स्वोपरक्तबुद्धिविषयीकरणमिति यावत् तद्रूपकमित्यर्थः ।''[16]

आचार्यः विश्वनाथः रूपकालङ्कारप्रतिपादनावसरे कथयति-

रूपकं रूपितारोपाद्विषये निरपह्नवे[17]

सन्दर्भेऽस्मिन् अनेकै आचार्यैः स्वकीयविचाराः प्रकटिताः । तत्र लक्ष्मीटीकाकारः □□□□□- रूपितस्याभिन्नतया कथितस्य उपमानस्यारोप आरोपणम्, यद्वा रूपितस्य निरूपितस्य रूपकघटकत्वेन निश्चितस्य उपमानाभेदस्य उपमानपदार्थतादात्म्यस्येति यावत्, आरोपः सादृश्यातिशयमहिम्ना पूर्वप्रतिपादितया सारोपाख्यलक्षणया आरोपणं रूपकम् ।[18]

□□□□रचन्द्रिकाकारश्च इत्थं निगदति-''उपात्तबिम्बाविशिष्ट-विषयधर्मिकाहार्यारोप-निश्चय-वि□□□भूतम् उपमानाभेद ताद्रूप्यान्यतरद् रूपकम् ।''[19]

□□□ □ □□□□रप्रकाशकारः एवं प्रतिपादयति-''अत्यन्तं सादृश्याद् उपमानोपमेययोः

अभेदवर्णनं रूपकमुच्यते। रूपकाल□□रे उपमेये उपमानस्यारोपो भवति ।''[20]

चन्द्रालोककारः जयदेवः रूपकालङ्कारस्य लक्षणमित्थं निरूपयति-

यत्रोपमानचित्रेण सर्वथाप्युपरज्यते।
उपमेयमयी भित्तिस्वत्र रूपकमिष्यते।।[21]

उपमामूलकं रूपकाल□□रं लक्षयन् आचार्यः कथयति यत् यत्र उपमेयरूपा भित्तिः उपमानरूपेण चित्रेण सर्वतोभावेन उपरज्यते तत्र रूपकालङ्कारः स्वीक्रियते □ अत्र उपमेयस्य □□□□□□ञ्जन□□□ □□मेयस्योपमानात्मना प्रतिपादनम्। यतोहि अन्येन केनचिद्रत्नेनो□□ञ्जन□□□ यथा वस्तुनः वास्तविकस्य रूपस्य ज्ञानं न भवति अपि तु रिञ्जतस्यैव रघ्णस्य बोधो भवति, □□□ यत्रेपमेयस्य ज्ञानं न भवति, अपि तूपमानस्यैव बोधो जायते तत्र रूपकालङ्कारो □□□ □ □□□□□□य्याः भित्याः उपमानमयेन चित्रेणोपरञ्जनमेव आरोप इत्युच्यते □ कुवलयानन्दकारः रूपकाल□□□□□□□□□□□□-

''□□□य्यभेदताद्रूप्यरञ्जनं विषयस्य यत्तद्रूपकम्''[22]

लोकमान्यालङ्□रे कविना रूपकाल□□रस्योदाहरणं मन्दाक्रान्ताछन्दसि उपस्थापितं वर्तते-

बाले साक्षात्तपन उदिते स्वाभिमानेऽद्रिशृङ्गे□
अस्तं प्राप्ता भुवनतलतः पारतन्त्र्यं दिवान्धाः ॥
स्वातन्त्र्याख्यं विकसति चिरं पप्रजातं सुकोशं
मोदं प्रापुस्त्वरितमतुलं राष्ट्रभक्ताश्च भृङ्गाः ॥[23]

करमलकरवर्यः कथयति यत् स्वाभिमानेऽद्रिशृङ्गे□उदिते बाले सूर्ये भुवनतलतः पारतन्□□ दिवान्धाः अस्तं प्राप्ताः। स्वातन्त्र्याख्यं पप्रजातं सुकोशं चिरं विकसति। अपि च तद्दृष्टवा राष्ट्रभक्ताः □□□□ त्वरितमेव अतुलं मोदं प्रापुः। अत्र बालग□□धरतिलके सूर्यस्य ब्रिटिशजनेषु दिवान्धस्य स्वातन्त्र्ये कमलपुष्पस्य भारतीयेषु च □□□□□साक्षादारोपः कृतः वर्तते। इत्थं श्लोकेऽस्मिन् रूपकाल□□रस्य सुन्दरं चित्रमुपस्थापितं कविना।

(4) अपह्नुतिरलङ्क□रस्योद□□□□□

अपह्नुतिरलङ्क□रः सादृश्यमूलकालङ्□रो वर्तते □ अस्य द्वितीयो भेदो भवति अभेदप्रधानाल□□□□ □ तस्य च आरोपमूलकः अध्यवसायमूलकश्चेति द्वौ भेदौ □□□□ □ तत्र अपह्नुतिरलङ्क□□ □□□□□□□□□□□□□□□ □□□□□□ □

मम्मटाचार्यः अल□□रनिरूपणावसरे अपह्नुतिरलङ्□रमुद्दिश्य कथयति उपमेयमसत्यं कृत्वा उपमानं सत्यतया यत्स्थाप्यते सा त्वपह्नुतिः इति-

'प्रकृतं यन्निषिध्यान्यत्साध्यते सा त्वपह्नुतिः'[24]

□□□□ विश्वनाथाचार्यः स्वीये ग्रन्थे निगदति-प्रकृतं निषिध्य अन्यस्य स्थापना एव अपह्नुतिः वर्तते। -

''प्रकृतं प्रतिषिध्यान्यस्थापनं स्यादपह्नुतिः[25]

साहित्यदर्पणस्य लक्ष्मीटीकाकारेण उच्यते- ''प्रकृतं वर्णनप्रक्रान्तम् उपमेयमित्यर्थः प्रतिषिध्य शब्दतोऽर्थतो वा असत्यतया व्यवस्थाप्य, अन्यस्य अप्रकृतस्य उपमानस्येत्यर्थः स्थापनं सत्यतया साधनम् आहार्यनिश्चयविषयीकरणमितियावत् अपह्नुतिर्नामालङ्कारः।''[26]

चन्द्रालोके अपह्नुतिरलङ्क□रं लक्षयन् जयदेवाचार्यः कथयति यत् यत्र अतथ्यम् असत्यमारोपयितुं तथ्यस्य सत्यस्य अपास्तिः निषेधो भवति तत्रऽ□□□□□रः ज्ञातव्यः।

'अतथ्यमारोपयितुं तथ्यापास्तिरपह्नुतिः।'[27]

अर्थात् यत्र असत्यस्य स्थापनार्थं वास्तविकस्य वस्तुनो निषेधः क्रियते तत्र अपह्नुतिरलङ्क□□□ □□□□ । उदाहरणत्वेन च प्रदर्शयति-

''नायं सुधांशुः किं तर्हि व्योमगङ्गास□□रुह□''28

लोकमान्यालङ□□□□ □□□रस्यास्य उत्कृष्टमुदाहरणं प्रस्तौति गजाननवर्यः-

नेदं भारतवर्षमस्ति नगरीयं स्वर्णरत्नाकरा
एते नाघ्लजनाः परस्वहरणे धूर्ता वणिक्सज्जनाः।
नानामोहकमोघवस्तुनिकरं चातुर्यवृत्त्या निजं
दत्वा वः कनकं हरन्ति विपुलं वः स्वामिनां पश्यताम्॥[29]

अत्र कविः कथयति यत् इदं भारतवर्षं न अपि तु इयं स्वर्णरत्नाकरा नगरी विद्यते। अपि च नैते आघ्लजनाः। एते तु धूर्ता वणिक्सञ्जनाः परस्वहरणे निपुणाः। एते च स्वीयं नानाप्रकारकं मोघं व्यर्थं वस्तुसमूहं चातुर्यवृत्त्या छलेन दत्वा अस्माकं विपुलं कनकं हरन्ति । उदाहरणेऽस्मिन् वास्तविकस्य भारतवर्षस्य आघ्लजनानाञ्च निषेधं कृत्वा स्वर्णरत्नाकरानगŌर्याः धूर्तानां वणिक्सज्जनानाञ्च स्थापना कृता वर्तते। तस्मादत्र स्पष्टतया अपह्नुतिरलङ्कारो विद्यते।

(5) अप्रस्तुतप्रशंसालङ्□रस्योद□□□□□

अप्रस्तुतप्रशंसालङ्□रे अप्रस्तुतवृत्तान्तस्य वर्णनम् प्रस्तुतवृत्तान्तस्यावगतौ पर्यवसितं □□□□ □ कविः अप्रस्तुतविषये कथयित्वा प्रस्तुतविषये ज्ञापयति । अप्रस्तुतवृत्तान्तस्य वर्णनेन प्रस्तुतवृत्तान्तस्य प्रतीतिः एतयोः द्वयोः अप्रस्तुतप्रस्तुतयोः सम्बन्धे सति सम्भवति । अनयोः सम्बन्धः त्रिधा भवति । सारूप्यसम्बन्धः, सामान्यविशेषभावसम्बन्धः कार्यकारणभावसम्बन्धश्च । काव्यप्रकाशकारानुसारेण अप्राकरणिकस्याभिधानेन प्राकरणिकस्याक्षेपोऽप्रस्तुतप्रशंसा भवति-

'अप्रस्तुतप्रशंसा या सा सैव प्रस्तुताश्रया'[30]

चन्द्रालोककारः अलङ्□रस्यास्य विषये कथयति-

अप्रस्तुतप्रशंसा स्यात्सा यत्र प्रस्तुतानुगा ।
कार्यकारणसामान्यविशेषादेरसौ मता ।।[31]

□□□□□□स्मिन् अप्रस्तुतकारणेन प्रस्तुतकार्यस्य प्रतीतिः, अप्रस्तुतकार्येण प्रस्तुतकारणस्य प्रतीतिः, अप्रस्तुतविशेषेण सामान्यस्य प्रतीतिः, अप्रस्तुतसामान्यद्वारा विशेषस्य प्रतीतिः, तथा च समाप्रस्तुतेन समप्रस्तुतस्य प्रतीतिः भवति ।

अप्रस्तुतप्रशंसालङ्□रस्य उदाहरणं करमलकरवर्येण लोकमान्यालङ्कारे इत्थं प्रस्तुतम्-

स्थित्वा स्वर्णसुपञ्जरे बहुविधं सौख्यं न यो वा×□□□
जीवत्यात्मपराक्रमेण भुवने राजन् स्वतन्त्रः सदा ।
नित्यं गर्जनया स्वदेशकृतया भूभृत्स्थिरत्वं हरन्
धन्यो वञ्चकभीतिदः स च हरिर्दास्यं न यस्मै प्रियम् ।। 32

□□□□□□स्मिन् अप्रस्तुतस्य सुवर्णपञ्जरस्य द्वारा प्रस्तुतस्य पारतन्त्र्यस्य, अप्रस्तुतस्य □ञ्चकस्य शृगालस्य द्वारा प्रस्तुतस्य आघ०लशासकस्य, अप्रस्तुतस्य आत्मपराक्रमशालिनः मृगेन्द्रस्य द्वारा प्रस्तुतस्य बालगङ्गाधरतिलकस्य च सुष्ठुप्रकारेण ज्ञापनं कृतं वर्तते । तस्मादत्र अप्रस्तुतप्रशंसालङ्□रो विद्यते ।

(6) विशेषोक्तिरलङ्कारस्योद□□□□□

□□□□□□□□□□□□□□□□ □ लोके कार्यकारणसम्बन्धः अतीव प्रथितो वर्तते । प्रायशः कारणं विना कार्यं नैव सम्भवति । तथा च कारणं प्रबलं भवति चेत् कार्यम् अवश्यं सिद्ध्ड्ढति । परन्तु सहृदयास्तु विना कारणमपि कार्यं साधयन्ति । एवमेव क्वच्चित्तु कारणे सत्यपि कार्यं नैव

सिद्धयति । विभावनायाः विपरीतं भवति विशेषोक्तिः । अलङ्क□□स्मिन् कारणानि दृश्यन्ते परन्तु कार्यं नैव सिद्ध्यति □ प्रायशः सर्वैरप्यालङ्क□रिकैः एतदेवा□□क्रियते । मिलितेष्वपि कारणेषु कार्यस्याकथनं विशेषोक्तिरिति मम्मटाचार्यः कथयति-

'विशेषोक्तिरखण्डेषु कारणेषु फलावचः ।'[33]

आचार्यः विश्वनाथस्तु साहित्यदर्पणे विशेषोक्तेः भेदद्वयमङ्गीकृत्य निगदति-

'सति हेतौ फलाभावे विशेषोक्तिस्तथा द्विधा'[34]

सन्दर्भेऽस्मिन् श्रीमता अप्पयदीक्षितेन उच्यते-

''कार्याजनिर्विशेषोक्तिः सति पुष्कलकारणे ।
हृदि स्नेहक्षयो नाभूत्स्मरदीपे ज्वलत्यपि ।।''[35]

विशेषोक्तिरलङ्कारं वर्णयन् चन्द्रालोककारः जयदेवः कथयति-

''विशेषोक्तिरनुत्पत्तिः कार्यस्य सति कारणे ।''[36]

पण्डितगजाननकरमलकरमहोदयेन स्वीये लोकमा□ □□□□ □□□□रस्यास्य उत्कृष्टमुदाहरणं प्रस्तुतं वर्तते-

ग्रीवायां दधते जनाय सुखदं हार्यं न चौरादिभिः
यल्लब्ध्वा भवतीह निर्धनपुमान् श्रीमाँस्तथा भाग्यवान् ।
सर्वस्वं सकलाय तद्वितरता ''गीतारहस्यं'' □□□□
दारिद्रं भवता कदापि न धृतं स्वाश्चर्यमेतन्महत् ।। [37]

इहलोके यद्धनं प्राप्य निर्धनोऽपि पुरुषः धनवान् भाग्यवान् च भवति □ तन्महत्त्वभूतं धनं तिलकवर्यः सततं स्वग्रीवायां धारयति । परन्तु चौरैः तद्धनम् नैव अपहृतम् । अपि च व्यये कृते धनं क्षीयते इति निश्चप्रचम् । परन्तु गीतारहस्यं नाम सर्वस्वं धनं सर्वेभ्यः वितरता अपि तिलकमहोदयेन कदापि दारिद्र्यं नैव □□□□□□□ अत्र वर्णितं विषयद्वयमपि आश्चर्यकरम् □ □□□□□□स्मिन् कार्यसिद्ध्यर्थं पर्याप्तकारणं वर्णितम् । परन्तु धनहरणद□रिद्र्यरूपकार्यद्वयमपि नैव सिद्धम् । तस्मादत्र स्पष्टतया विशेषोक्तिरलङ्क□रः अन्वेति ।

इत्थं लेखे□स्मिन् अनन्वय-प्रतीप-रूपक-अपह्नुति-अप्रस्तुतप्रशंसा-विशेषोक्तिरलङ्का□-नधिकृत्य प्रदत्तानामुदाहरणानां विश्लेषणं कृतम् । करमलकरवर्येण अलङ्□□रपरम्परायां काचित् विनूतना सरणिः सफलतया प्रवाहिता वर्तते । अनेन स्फुटतया वक्तुं शक्यते यत् लोकमान्यालङ्कारे सर्वतोभावेन अलङ्□□रप्रतिपादनवैशिष्टड्ढं परिलक्ष्यते ।

-- टिप्पणी --

1- □-□-,□-□□-59/31

2- तत्रैव -22/29

3- □-□-,□-□□- 66/03

4- काव्यालङ्□रसूत्रम् - 1/1

5- तत्रैव - 1/2

6- कुवलयानन्दे - □-168

7- गजाननग्रन्थावली-□-टप्प्

8- साहित्यदर्पणे - 10/26

9- साहित्यदर्पणस्य लक्ष्मीटीकायां- पृ- 673

10- चन्द्रालोके - 5/12

11- लोकमान्यालङ्□रे श्लोकसं – 06

12- काव्यप्रकाशे - 10/13

13- साहित्यदर्पणे- 10/87

14- चन्द्रालोके - 5/100

15- लोकमान्यालङ्□रे श्लोकसं- 08

16- कुवलयानन्दस्य, रसिकरिञ्जनीव्याख्यायां - पृ- 69

17- साहित्यदर्पणे- 10/28

18- साहित्यदर्पणस्य लक्ष्मीटीकायां - पृ- 676

19- □□□□रचन्द्रिकायां - पृ-15

20- □□□□रप्रकाशे - □-39

21- चन्द्रालोके - 5/18

22- कुवलयानन्दे - 16

23- लोकमान्यालङ्□रे श्लोकसं – 11

24- काव्यप्रकाशे - 10/431

25- साहित्यदर्पणे - 10/38

26- साहित्यदर्पणस्य लक्ष्मीटीकायां - पृ- 800

27- चन्द्रालोके - 5/24

28- तत्रैव - 5/24

29- लोकमान्यालङ्□रे श्लोकसं- 23

30- काव्यप्रकाशे - 10/98

31- चन्द्रालोके - 5/66

32- लोकमान्यालङ्□रे श्लोकसं- 63

33- काव्यप्रकाशे - 10/108

34- साहित्यदर्पणे - 10/67

35- कुवलयानन्दे श्लोकसं- 82

36- चन्द्रालोके - 5/68

37- लोकमान्यालङ्□रे श्लोकसं- 30

------------ 0 --------------

न्यायसिद्धान्तदीपस्य कर्ता शशधरः

उत्तमकुमारसिंहः
अनुसन्धाता, न्यायविभागः
राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः
E-Mail - uttamsingha3@gmail.com

————————————————

सारांशः

षडास्तिकदर्शनेषु न्यायदर्शनस्य नाम सर्वादौ आगच्छति । अस्य दर्शनस्य प्रणेता गौतमः उच्यते । गौतमादनन्तरं नैके नैयायिकाः अस्याः परम्परायाः अग्रेसारणं कृतवन्तः । द्विसहस्रवर्षेभ्यः पूर्वं प्रारब्धेयं परम्परा इदानीं सर्वत्र देशेषु विदेशेषु च आदृता दृश्यते । नैयायिकानां परम्परा द्विधा विभज्यते । यथा – प्राचीनन्यायः, नव्यन्यायश्चेति । तत्र वात्स्यायनः, उद्योतकरः, वाचस्पतिमिश्रः, प्रशस्तपादः, उदयनः, श्रीधरः इत्यादयः नैके नैयायिकाः प्राचीनपरम्परायां प्रसिद्धः वर्तन्ते । तदनन्तरं प्रायशः द्वादशशतकात् प्रारभ्य नव्यन्यायधारायाः प्रादुर्भावो बभुव । अस्याः परम्परायाः प्रथमाचार्यः गङ्गेशोपाध्याय इति मन्यते । ततः पूर्वं प्रसिद्धोऽयं भवति शशधराचार्यः यस्य कालः विवदमानोऽस्ति । केचित् शशधरः गङ्गेशादर्वाचीनः केचिच्च प्राचीनः इति वदन्ति । अस्मिन् शोधपत्र तस्यैव शशधरस्य कालविषये काचन चर्चा विधीयते ।

न्यायसिद्धान्तदीपकर्तुः शशधरस्य नाम्नः बहुधा व्यपदेशः प्राप्यते । यथा – “शशधरः”[१], “शशधरशर्मा”[२], “शशधराचार्यः”[३], “महामहोपाध्यायशशधरः”[४], “शशधरभट्टाचार्यः”[५] “शशिधरः”[६] इति । परन्तु न्यायसिद्धान्तदीपग्रन्थस्य आरम्भे मङ्गलश्लोके “शशधरशर्मा प्रकाशयति”इति स्वयमेव आत्मनः नाम प्रस्तावयति । इतरप्रमाणापेक्षया स्वेनैव स्वस्य नाम शशधर्मशर्मा इति कथनात् अस्य शशधरशर्मा इति नाम सिद्धं भवति । अत एव महामहोपाध्यायः उमेशमिश्रः संस्कृतग्रन्थे मैथिलब्राह्मणानाम् “शर्मा” इत्युपनामदर्शनात्, अस्यापि शर्मनामश्रवणाच्च मिथिला अस्य जन्मभूमिः इति निर्णयमकरोत्[७] । महामहोपाध्यायः, तार्किकशिरोमणिः शशधरः मौनसगौत्रीयः, धरणीधरपुत्रः, महेश्वरपण्डितस्य पौत्रः, पृथिवीधरस्य भ्राता इति नर्मदातीरस्य अल्हणदेव्याः भेराघाट्शिलाशासने दृश्यते । यथा —

मौन्यान्वे भार्गववैतहव्या-
सावेतसेतिप्रवत्रयाढ्ये ।
महेश्वराख्याद्धरणीधरोऽभू-
न्नाम्ना गरिम्णा यशसा श्रिया च ।। ३२ ।।
कोमलकान्तिसटालेनोच्चैः स्नेहातिभारभरितेन ।
दीर्घमनोज्ञदशेन त्रिभुवनदीपायितं येन ।। ३३ ।।
पृथ्वीधरस्तस्य सुतः समस्त-
गभीरशास्त्रार्णवपारदृश्वा ।
प्रशस्तिमेतामलिखद्यदोयै-
र्दिङ्मण्डलीशिष्यगणैर्विजिग्ये ।। ३४ ।।
एतस्यावरजस्तर्कनिष्णातोद्धुतनैपुणः ।
प्रशस्तिमकरोदेतान् सूरिः शशिधराभिधः ।। ३५ ।।
असूत्रयदिदं सर्वं विश्वकर्मविधानवित् ।
पीथेसमभिधः सूत्रधारः पृथ्वीम्पृथुर्यथा ।। ३६ ।।
सूत्रधाराग्रणीबालसिन्हसूनुर्महीधरः ।
शिालन्तथाकरोद्वर्णै नभस्तारकितं यथा ।। ३७ ।। इत्यादिः ।
(संवत् ९०७ मार्गसुदि ११ रवौ)

शशधरस्य समयः — शशधरकृतन्यायसिद्धान्तदीपस्य टिप्पणटीकायाः सम्पादकाः बि.के.मातिलालमहोदयाः तद्ग्रन्थस्य भूमिकाभागे शशधर-गङ्गेशोपाध्याययोः पूर्वापरत्वनिर्णये स्वविचारं प्रस्तुतवन्तः । तेषां मतेन गङ्गेशोपाध्यायात् प्राचीनो भवति शशधरः । तदत्र किञ्चित् पर्यालोच्यते ।

(१) न्यायसिद्धान्तदीपे विधिबद्धतया क्रमशः विविधाः प्रतिपादितास्सन्ति । किन्तु गङ्गेशोपाध्यायस्य तत्त्वचिन्तामणौ तथा न दृश्यते । अत्र विषयाः तथा एकीकृताः न वर्तन्ते । वर्णनाक्रमः ग्रन्थस्य मुख्यप्रतिपाद्यविषयेण सह सम्बद्धो दृश्यते । सप्तदशशतके गदाधराख्यः नव्यनैयायिकः प्रायशः ६४ वादानां संग्रहं कृत्वा ग्रन्थमेकं प्रणीतवान् । एवमत्र निष्कर्षो भवितुमर्हति यत् गङ्गेशोपाध्यायेन इतस्ततः चर्चिताः विषयाः ततः परवर्त्तिकाले शशधरेण सज्जीकृत्य लिखिताः ।

(२) न्यायसिद्धान्तदीडस्य समुपलब्धायां प्रभाटीयाकां शेषानन्ताचार्यः केषुचित् स्थलेषु प्रतिपादयति यत् शशधराचार्यः गङ्गेशोपाध्यायस्य मतविरोधितायाः खण्डनार्थमेव

स्वग्रन्थं रचयामासेति (सहजशक्तिवादे) । शेषानन्ताचार्यः तत्रैव शब्दप्रामाण्यवादे लिखति – **"न चैषान्वय-ज्ञाने जनयितव्ये स्वज्ञानमपेक्ष्यते"** इति। अनेन शशधरः गङ्गेशस्योपरि आक्षेपं प्रदर्शयतीति प्रतिभाति । तत्र शेषानन्ताचार्यस्य सम्पूर्णोऽनुच्छेदो यथा –

"यत्तु राजा पुत्रमाकाङ्क्षति पुरुषं चेति संशयव्यतिरेकनिश्चयप्रतिबन्धकतया तात्पर्य–गर्भाकाङ्क्षाज्ञानस्य कारणताभिधानं चिन्तामणिकृतस्तात्पर्यज्ञानस्य कारणतां गमयति न तदितर–गर्भस्येत्यप्रयोजकमित्यभिप्रेत्या — **न चैषान्वयेति** ।" (न्याय.सि.दी.प्रभाटीका)

अनेन एतत्सिद्ध्यति यत् शशधर–गङ्गेषयोर्मध्ये शशधरः गङ्गेशपरवर्त्तीति । किन्तु अनेकेषु उदाहरणेषु उद्धरणेषु च गङ्गेशोऽपि शशधरमुल्लिखति । अतः उभयोर्मध्ये पूर्वापरत्वनिर्णयः कष्टसाध्य एव । अस्मिन् सन्दर्भे गङ्गेशस्य तत्त्वचिन्तामण्याः प्रत्यक्षमणिटीकायामुद्धरण- मिदमालोचनीयं वर्तते । यथा – **"विष्णुपुराणानुसारि-शशधरीयलक्षणमाह - यत्तु रागेति"** इति ।

(३) एवमुभयोः पूर्वापरत्वविषये सन्देहे सति तयोः "शिष्ट" इति पदव्याख्याने कृतमनुचिन्तनं विचारणीयं भवति । शशधरेणात्रोच्यते – "क्षीणदोषपुरुषत्वमेव शिष्टम् । तथाभूतत्वञ्च मन्वादीनामेव सुप्रसिद्धम् ।" इति । गङ्गेशेनोपस्थाप्यते अस्योत्तररूपेण – "यत्तु रागद्वेषक्षीणः शिष्टः, स च सर्वज्ञत्वान्मन्वादिरेव, अविगीततदाचारादेव वेदानुमानमिति, तन्न" इति । गङ्गेशोऽत्र उदारतां प्रदर्शयति । एतन्मतानुसारेण कश्चन आधुनिकोऽपि शिष्टो भवितुमर्हति, यदि सः सदाचारयुक्तः स्यात् । सदाचारो नाम शुद्धाचारणम् । देशात् देशान्तरे सदाचाराः भिन्नाः भवन्ति । आचरणञ्च शास्त्राधिकारेण सह समानं भवेदिति । तदुक्तं तेन—

"आधुनिकानामपि शिष्टत्वेन व्यवह्रियमाणत्वाच्च । तथा च स्मृतिः –

यस्मिन् देशे य आचारः पारम्पर्यक्रमागतः ।
श्रुतिस्मृत्यविरोधेन सदाचारस्स उच्यते ।।" (तत्त्वचिन्तामणिः)

अनेन स्पष्टतया प्रतीयते यत् गङ्गेशस्य मतवादः शशाधरापेक्षया विकसितः दृश्यते । अतः शशधरादर्वाचीनः गङ्गेशः इति प्रतिभाति ।

(४) शशधरेण सप्तविंशतिप्रकरणे याः समस्याः आलोचिताः, ताः सर्वा अपि गङ्गेशस्य तत्त्वचिन्तामणिग्रन्थे प्राप्यन्ते । एतदपि प्रमाणयति यत् शशधरः गङ्गेशात् प्राचीन इति ।

एवं बि.के.मातिलालवर्याः शशधरस्य गङ्गेशपूर्वकालित्वं वदन्ति । शशधरस्य कालनिर्णये केचन विचाराः अत्र प्रस्तूयन्ते ।

(१) शशधरः स्वग्रन्थे न्यायसिद्धान्तदीपे उदयनाचार्यस्य वचनानि प्रमाणत्वेन दर्शयतीति उदयनाचार्यात् परवर्ती एवं त्रयोदशशतके लब्धजन्मना नव्यनैयायिकगणरत्नप्रायेण, गङ्गेशोपाध्यायेन सिंहव्याघ्रोक्तलक्षणदूषणात् गङ्गेशोपाध्यायतः प्राक्कालीनः इति स्पष्टं प्रतीयते । शोधकः सतीशचन्द्रविद्याभूषणः – "गङ्गेशेन यन्निराकृतं सिंहव्याघ्रलक्षणं तत् शशधर–मणिधरयोर्न भवति ; सिंहव्याघ्रौ तु आनन्दसूरि–अमरचन्द्रसूरीनामकौ जैनतार्किकौ"[८] इति अभिप्रैति । मणिधर–शशधरौ महद्विद्वांसौ प्रसिद्धौ च । अपरिमिततर्कविद्याप्रखरपाण्डित्येन सिंहव्याघ्रपदभूषणौ आस्ताम् ; न तु शिशुकपर्दभूषणौ । अतः सिंहव्याग्रौ मणिधर–शशधरौ एव स्याताम् इति महामहोपाध्यायः उमेशमिश्रः अभिप्रैति । वस्तुतः आनन्दसूरि–अमरचन्द्रसूरीनामकौ द्वौ जैनतार्किकौ "नागेन्द्रगच्छ" इत्यस्य शिष्यौ । अनयोः द्वयोः अप्रतिमपाण्डित्यमवलोक्य १०९९–११४३ ए.डि.वर्त्तिना जयसिंहसिद्धराज– चालुक्येन व्याघ्रशिशुक–सिंहशिशुक इत्यभिधानाभ्यां सम्मानितौ च[९] । एवमेतयोः सिंहव्याघ्र इति व्यवहारः आसीत् । अमुं व्यवहारं मनसि निधाय भागशः सतीशचन्द्रविद्याभूषणेन मणिधरशशधरौ सिंहव्याघ्रौ न भवतः इत्युक्तं स्यात् । तथा च शिशुकशब्दघटितौ जैनावेव । न तु शशधरमणिधरौ। शशधरमणिधरयोः पक्षादेव मणिकारेणानूद्य खण्डितौ । अनेन शशधरस्य समयः प्रायशः ख्री.अ. द्वादशशतकमिति ज्ञायते ।

विद्याभूषणः एकस्याः बङ्गपरम्परायाः उल्लेखं कृत्वा तत्र शशधरस्य समयः 1125 A.D. आसीदिति उल्लिखति स्वग्रन्थे The History of Indian Logic इत्यत्र । न्यायसिद्धान्तदीपस्य प्रभाटीकायाः कर्ता शेषानन्ताचार्यः 1300 A.D. कालिकः इत्यपि तत्र उल्लिखितमस्ति । किन्तु तत्र किमपि दृढं प्रमाणं न प्रदत्तम् । शेषानन्ताचार्यस्य प्रभाटीकायाः सम्पादनावसरे ढुण्ढिराजशास्त्रिवर्यः शशधरस्य समयविषये सूचयति यत्[१०] — "पुरातनग्रन्थेभ्योऽवगतमपि गौतमसिद्धान्ततत्त्वं मीमांसकादिसिद्धान्ततमसाऽऽवृतया न तद्विजिगीषूपयुक्ततरमिति विशेषतस्तदर्थमेवात्र ग्रन्थकर्त्रा **"वादिवागीश्वरादि"**मतखण्डनं प्रदर्शितम् । मौनसगोत्रोत्पन्नश्चायं शशधराचार्यः धरणीधराचार्यस्य पुत्रः महेश्वरपण्डितानां पौत्र इति श्रूयते । पृथ्वीधराचार्यश्चास्य भ्राता । समयश्चास्यात्रैव ग्रन्थे प्रमाणतया समुद्धृतानामुदयनाचार्य–प्रणीतकारिकाणामुल्लेखात् –

तर्काम्बराङ्कप्रमितेष्वतीतेषु शकान्ततः ।
वर्षेषूदयनश्चक्रे सुबोधं लक्षणावलीम् ।।

इति लक्षणावलीस्थोदयनकालात् अर्वाचीनः १३०० (शकः) (1278 A.D.) कालीनः वादिवागीशादि–समयाच्च पराचीनः १२०० (शकः) (1378 A.D.) कालीन इति प्रतीयते ।

बङ्ग–मिथिलाप्रदेशयोः नव्यन्यायपरम्परायाः क्रमिकविकासस्य इतिहासं ज्ञातुं कृतप्रयत्नः आचार्यः डि.सि.भट्टाचार्यः स्वीये History of Navya-Nyaya in Mithila नामके ग्रन्थे ढुण्ढिराजप्रोक्तोऽयं समयः भ्रमात्मकः इति उल्लिखति । यथा –

"The whole of it seems to be a canard. Hearsay in the present century cannot record so many exact details about a scholar of the 13th Century."[११]

तथैव "बङ्गनव्यन्यायचर्चा" इत्याख्ये ग्रन्थेऽपि भट्टाचार्यवर्यः स्पष्टयति यत् तस्मिन् समये कुत्रापि शशधरस्य गोत्रसन्दर्भे अथवा तत्पितुस्सन्दर्भे किमपि विशिष्टं प्रमाणं न प्राप्यत इति । एवम् आचार्यस्य भट्टाचार्यस्य ढुण्ढिराजस्य तथ्योपरि प्रयुक्तः कर्कशः "Hearsay" शब्दः परवर्त्तिकाले न्यायसिद्धान्तदीपस्य टिप्पणटीकायाः सम्पादकेन विमलकृष्णमातिलालेन निराकृतः । तेनोच्यते[१२] –

"Sasadhara was mentioned in some manuscripts as Sasidhara. For example B.R.Bhandarkar in his Report on the Manuscripts in Central India and Rajaputana (राजस्थान मे संस्कृत साहित्य खोज के विषय में एक विशिष्ट विवरण) noted a manuscript of Nyaya Siddhanta Deepa (NSD) of Sasidhara (p.52). This manuscript of NSD is dated 1631 Samvat (1575 A.D.). Moreover, Sasadhara, in the seminaries of Mithila and Bengal, is sometimes referred to as "Sashidhara". Thus, we may conclude that Sasidhara was an alternative name for Sasadhara. If this conjucture is right, then Pandit Dhundhiraja's information as well as the following evidence becomes very much pertinent in assigning a date of Sasadhara and NSD."

वि.के.मातिलालमहाभागः भेराघाटशिलाशासनस्य अधः खोदितं दिनाङ्कम् (संवत् ९०७ मार्गसुद्दि ११ रवौ) आश्रित्य शशधरस्य कालं निर्धारयितुं प्रयत्नं विदधाति । सन्दर्भेऽस्मिन् शिलाशासनस्य सम्पादकयोः Dr.Fitz Edward तथा F.Kielhorn इत्यनयोः मतवादम् उद्धरति । Dr.F.E.Hall महाभागः प्रप्रथमतया शिलाशासनस्यास्य सम्पादन–

मनुवादञ्च कृत्वा Journal of the American Oriental Society (JAOS), Vol.VI (1958-60 A.D.) इत्यस्यां पत्रिकायां प्रकाशितवान् । शिलाशासनस्य अन्तिमपङ्क्तिः तेन एवं व्याख्याता – "The Year 907, on Sunday, the 11th of the bright half of Margashirsha" इति ।

शिलाशासनेऽस्मिन् शशिधरस्य तत्पितुः धरणिधरस्य पितामहस्य महेश्वरस्य च नामानि प्राप्यन्ते । अयं शशिधरः मौनगोत्रीयः आसीत् । तस्य ज्येष्ठाभ्राता पृथ्वीधरः प्रशस्तिपत्रमिदं रचितवान् तथा च महीधरेण (एकस्य शिल्पिनः बालसिंहस्य पुत्रेण) खोदितः । अत्र शिलालेखस्यास्य सम्बन्धः अल्हणदेव्या साकं वर्तते । एषा उदयपुरस्य राणायाः कन्या तथा च गयकर्णदेवस्य राज्ञी तथा माल्वासाम्राज्यस्य राज्ञः उदयादित्यस्य एषा पौत्री अपि आसीत् । उदयादित्यस्य पुत्रः लक्ष्मीधरः यदा शासनमकरोत्तदा तस्य ज्येष्ठः भ्राता नरवर्मा तस्मै एकं ग्रामं प्रादात् । अयं समयः 1104 A.D. अभूत् । हल्–महोदयः अत्र उदयादित्यस्य समयः 1075 A.D. इत्यभिप्रैति । अनेन अह्लणदेव्याः समयः उदयादित्या परवर्तीति ज्ञायते । किन्तु शिलाशासने ९०७ संवत् इति लिखितं वर्तते । हल् अस्मिन् सन्दर्भे संशयग्रस्तो भवति । विक्रमसंवत् अथवा शालिवाहनशकः इत्युभयत्र कुत्रापि अह्लणदेव्याः समयो निर्धारयितुं दुश्शको जायते । अत्रापि विक्रमसंवत्सराधारेण संवत् ९०७ मार्गशीर्षमासे एकादशः दिनाङ्कः रविवासरो न भवति । अतोऽह्लणदेव्याः समयः सन्देहात्मको जायते ।

हल् जबलपुरसमीपे अपरमपि एकं शिलालेखम् अवाक्षीत् यत्र शशधर–नामदेव–महीधराणां नामानि प्राप्यन्ते । महीधरः अस्य शिलाशासनस्य सूत्रधारत्वेन प्रतिपाद्ये । शिलालेखेऽस्मिन् "संवत् षड्विंशत्युत्तरनवशताब्देऽपि ९२६" इति तस्य समयः उल्लिखितः ।

एवं प्रकारेण हल्–महोदयस्य विचारद्वयं शिलाखस्य समयसन्दर्भे JAOS मध्ये प्राप्यते। परवर्त्तिकाले F.Kielhorn महाभागः हल्–वर्यस्य विचारं संशोध्य १८९४ खीष्टाब्दे Epigraphia Indica, Vol.II इति पत्रिकायां प्रकाशितवान् । अत्र अह्लणदेवीशिलालेखस्य कालः अधोलिखितप्रकारेण तेन प्रतिपादितः । यथा –

"Our inscription is dated, at the end of the last line, in the year 907, on Sunday, the 11th of the bright half of Margashirsha, - a date which must of course be referred to the Kalachuri of Chedi era... with my epoch of the Kalachuri Era, as to the general correctness of which there can now be

hardly any doubt, and according to the way in which the other Kalachuri dates yield satisfactory results, our date should fall in A.D.1155. But in A.D. 1155 the 11th ***tithi*** of the bright half of Margashirsha commenced 2 h.12 m. after mean sunrise of Sunday, the 6th November, and ended 0 h. 43 m. after mean sunrise of Monday, the 7th November apparently causing sudi 11 to correspond, civilly, to the Monday. In the following year, A.D.1156, on the other hand, the same 11th tithi of the bright half of Margashirsha ended 1h. 46 m. after mean sunrise Sundya, the 25th November, and consequently, in that year, sudi 11 was, civilly, really a Sunday. Now that the day intended by the original date is either Sunday the 6th November A.D.1155, or Sunday, the 25th November A.D.1156, appears to me certain; but I am not at present prepared to say confidently which of these two Sundays is the true date." *(p.9 Epigraphia Indica.II)*

एवं प्रकारेण F.Kielhorn मतानुसारेण शशिधरस्य समय: 1174 A.D. इति प्रमाणीक्रियते। उपर्युक्तपर्यालोचनया एतत्स्पष्टं प्रतीयते यत् शशधर: पश्चिमभारतीय: विशिष्टतया मिथिलावास्तव्य: आसीदिति । शशधर: स्वग्रन्थे उदयनाचार्यस्य नाम बहुवारम् उद्धरति । D.C.Bhattacharya मतानुसारेण उदनयस्य समय: 1025 A.D. to 1100 A.D. मन्यते । शशधरेण अपर: वादिवागीश्वराख्य: दार्शनिकोऽपि उद्धृत:, येन "मान–मनोहर:" इति ग्रन्थ: रचित: । अयं ग्रन्थ: न्यायपरिशुद्धिग्रन्थे रामानुजसम्प्रदायस्य प्रसिद्ध–दार्शनिकेन वेङ्कटनाथश्रीवेदान्तदेशिकेन उद्धृत: (चौखम्बासंस्करणम्, पृ.२७८) । वेङ्कट–नाथस्य समय: 1267 A.D. - 1369 A.D. भवति । द्वादशशतकस्य चित्सुखाचार्योऽपि वादिवागीश्वरस्य मतखण्डनं करोति ।

एवमेतादृशानि मतानि संगृह्य मातिलालमहोदय: शशधरस्य समय: 1125 A.D. त: परं न स्यादिति अभिप्रैति ।

– टिप्पणी –

१) ज्ञानाब्धिरक्षिचरण: कणभक्षकश्च
श्रीपक्षिणोऽप्युदयन: स च वर्धमान: ।
गङ्गेश्वरश्शशधरो बहवश्च नव्या
ग्रन्थैर्व्यरुन्धत इमे हृदयान्धकारम् ।।
(सुभा.रत्न.भा. - नैयायिकप्रशंसा - श्लो.४)

२) ध्वंसितपरसिद्धान्तध्वान्तं गौतममतैकसिद्धान्तम् ।
नत्वा नित्यमधीशं शशधरशर्मा प्रकाशयति ।।
(न्यायसिद्धान्तदीपः, मङ्गलश्लोकः)

३) सोऽयं शशधराचार्यकृतिव्याकृतिकैतवात् ।
सतः शार्ङ्गधरादिष्टपुष्टधीरुपतिष्ठते ।।
(शेषानन्ताचार्यस्य प्रभाटीका, प्रारम्भे - श्लो. १०)

४) "इति श्रीमहामहोपाध्यायश्रीशशधरकृतं न्यायरत्नप्रकरणं शशधराख्यं समाप्तम्" । (न्यायसिद्धान्तदीपस्य अन्तिमवाक्यम्)

५) History of Navyanyaya in Mithila/Ed-1958 pg.88-89

६) एतस्यावरजस्तर्कनिष्णातोद्भुतनैपुणः ।
प्रशस्तिमकरोदेतान् सूरिः शशिधराभिधः ।।
(नर्मदातीरस्य भेहराघाट्शिलाशासनम्-श्लो. ३५)

७) Nyayaratna - pg.104, Madras Govt., 1953

८) History of Indian Logic - S.C.Vidyabhushan

९) New Catologus Catlogurum - Vol.1, University of Madras/1968

१०) न्यायसिद्धान्तदीप-प्रभाटीका - भूमिकायां

११) History of Navyanyaya in Mithila, 1958, p.90

१२) Nyayasiddhanta Deepa, Tippana Tika, Introduction, p.12

------ o ------

अनुप्रासालङ्कारस्य स्वरूपवर्णनम्

□□.□।बलिचक्रवर्ती,
सहायकाचार्यः, साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः, आन्ध्रप्रदेशः।

सुविशाले संस्कृतवाङ्मये साहित्यशास्त्रं मूर्ध्नि वर्तते। इदं च साहित्यशास्त्रं सहृदयाह्लादजनकं मनोरञ्जकं च भवति। संस्कृतसाहित्ये मनोरञ्जकानि बहूनि काव्यानि, नाटकानि च दरीदृश्यन्ते। साहित्यशास्त्रमिदं लोके महत्वपूर्णं स्थानमावहति। "सङ्गीतं साहित्यं च सरस्वत्याः कुचद्वयम्" इयमुक्तिः साहित्यस्य महत्त्वप्रतिपादने बलं प्रददाति। साहित्यशास्त्रं सर्वेषां हितमिच्छति तस्मादेव सहितस्य भावः साहित्यम् इति कथ्यते। इदं च साहित्यं काव्यनाटकादिभिः परिपोषितं दृश्यते। अस्मिन् साहित्ये बहूनि काव्यानि, नाटकानि च सर्वेषां रसास्वादकानां साहित्यपिपासकानाम् च आनन्दं जनयति। एतादृश महत्त्वपूर्णे साहित्यशास्त्रे यद्यपि विभावानुभावादि गुणाः, री□□□, □□□□, अलङ्काराः इत्यादि बहवः अंशाः वर्तन्ते तथापि काव्येषु अलङ्काराणां स्थानमतीव मुख्यं महत्त्वपूर्णं च वर्तते। सम्प्रति अस्मिन् शोधपत्रे अलङ्काराणां महत्त्वं प्रतिपादयन्, अनुप्रासालङ्कारस्य स्वरूपस्वभावं च प्रतिपाद्यते।

अलङ्कारपरिचयः –

अलङ्काराः काव्यस्य शोभां वर्धयन्ति। अलङ्कारशब्दस्य **अलङ्क्रियते अनेन** □□□ □□□□रः इति व्युत्पत्तिः दृश्यते। येषां द्वारा काव्यानां शोभा वर्धते ते भवन्ति अलङ्काराः। अलङ्कारशोभितकाव्यानि अत्यन्त सौन्दर्यसाधकानि, आनन्दप्रदायकानि च भवन्ति। अलङ्काराणां द्वारा तेषां काव्यानां शोभा वर्धते। अलङ्काराः संस्कृतसाहित्ये बहवः वर्तन्ते। यदि अलङ्क रविषये पश्यामः चेत् श्रूयते यत् – **काव्यं ग्राह्यमलङ्कारात् सौन्दर्यमलङ्कारः**[1] इति। अर्थात् अलङ्कारो नाम सौन्दर्यम्, अलङ्कृतिश्च। सौन्दर्यं वर्तते इत्यस्मात् कारणात् काव्यं ग्राह्यमित्यर्थः। यथा कटक-कुण्डल-हारादि□□ □□□□□□ कविताकामिन्याः सौन्दर्यवृद्धिर्भवति, तथैव अलङ्कारैः कविताकामिन्याः शोभा वर्धते।

---

[1] का.सू.वृ

[illegible]-[illegible]-उद्भट-रुद्रटादयः बहवः कवयः अलङ्कारविषये विशिष्य बहुधा कीर्तितं, वर्णितं, प्रतिपादितं च वर्तते।

भामहः अलङ्कारपदमिदं विस्तृतार्थे स्वकीयग्रन्थे काव्यालङ्कारः इति व्यपदिदेश। रुद्रटोऽपि काव्यालङ्कारः इत्येव नाम चकार। तथैव , [illegible] काव्यालङ्कारसूत्राणां च प्रणयनं कृतवन्तः। एतेषु न कोऽपि तादृशः केवलालङ्कारप्रतिपादकः अपितु अलङ्कारैः सह काव्यस्य शोभामेव वर्णनं कृतवन्तः। अतः काव्यसौन्दर्याधायकविषयाणां सम्पूर्णतत्त्वानां विवेचनशास्त्रमेव अलङ्कारशास्त्रमिति वक्तुं शक्यते।

अलङ्कारमहत्त्वम् –

अलङ्काराः काव्यस्य शोभां वर्धयन्ति। काव्ये अलङ्काराणां महन्महत्वमस्ति। अतएवोक्तम् **"न कान्तमपि विर्भूषं (निर्भूषं) वि[illegible]**[1]"। गुणगौरवसम्पन्ना [illegible] रसगुणादियुक्तमपि काव्यम् अलङ्काररहितं चेत् न शोभते अलङ्कारः शब्दार्थयोः न केवलं सौन्दर्यमेव साधयति अपि तु चमत्कृतिमपि आदधाति। सैव चमत्कृतिः क्वचित् उपमादि अलङ्कारैः द्योत्यते।

यद्यपि काव्यात्मरूपेण नास्य महत्त्वं, तथापि शब्दार्थशरीरस्य काव्यस्य बाह्यसौन्दर्यवर्धनेन समं रसादीनपि पोषयति। अलङ्कारस्य तादृशं महत्त्वं यथा शरीरे अलङ्कारादीनां वस्त्रादीनां वा। यथा सकलगुणसमन्वितोऽपि मानवो निर्वसनो न शोभते, कटककुण्डलाद्यलङ्काररहिता नारी न शोभते तथैव अलङ्कारहीनं काव्यमपि न शोभते। अग्निपुराणे उक्तं यथा - "**अलङ्[illegible] विधवैव सरस्वती**[2]"।

काव्ये अलङ्काराणां तथैव महत्त्वं यत् जीवने वस्त्रादीनामाभूषणानां यथा। उक्तं च –

वासः प्रधानं खलु योग्यतायाः
वासो विहीनं विजहाति लक्ष्मीः।
पीताम्बरं बीक्ष्य ददौ तनूजां,
दिगम्बरं वीक्ष्य विषं समुद्रः[3]**।।**

सालङ्कृतस्य निरलङ्कृतस्य च काव्यस्य तथाविधमेव वैषम्यम्।

[1] का.अ. -13
[2] [illegible]
[3] [illegible]

अलङ्कारस्य लक्षणानि –

अलङ्कारशब्दस्य निर्वचनोत्सुकैः अनेकैः आलङ्कारिकैः बहुधा यत्नः कृतः। तत्र विभिन्नानि लक्षणानि अलङ्कारविषये प्रतिपादितानि। तान्यथा –

1. **नाट्यशास्त्रे भर□□**

अलङ्कारलक्षणं वक्तुकाम इव वचनमवोचत् समस्तालङ्कारशास्त्रकर्तॄणां पितामहः मुनिर्भरतः।

उक्तञ्च -

भूषणैरिव चित्रार्थैः तद्भूषणमितिस्मृतम्।
अलङ्कारैर्गुणश्चैव बहुभिस्समलङ्कृतम्[1]॥

2. **काव्यालङ्कारसंग्रहे भ□□□□**

भरतः नाट्याङ्गत्वेन वाचिकाभिनये अंशत्वेन च अलङ्कारान् जग्राह। परन्तु भामहः प्रसिद्धः आलङ्कारिकः। अस्य ग्रन्थस्य नाम काव्यालङ्कारः। काव्यतत्व-विचाराविष्कारार्थमेवास्य ग्रन्थोद्यमः आसीत्। अनेन - "**न कान्तमपि निर्भूषं विभाति □□□□□□□□[2]**" उक्तम्। भूषाविरहिताः वनिताः यथा स्वप्रियेभ्यः न र , □□□ अलङ्कारविरहितानि काव्यानि सहृदयरञ्जकानि न भवन्तीति भावः प्रत्यपादि।

3. **काव्यादर्शे दण्डी**

काव्यादर्शकारः दण्डी स्वभावेनायं गुणवादी तथाऽपि अलङ्कारप्रियः। अलङ्कारशब्दनिर्वचने कथयति यत् - "**काव्यशोभाकारान् धर्मान् अलङ्कारान् प्रचक्षते**"[3]□ अस्य मतानुसारम् अलङ्काराः काव्यशोभाकाराः धर्माः। तेषां संख्यानियतिः □□□□□

4. **काव्यालङ्कारसूत्रवृत्तौ वा□□□**

काव्यालङ्कारसूत्रवृत्तिकारः वामनाचार्यः – "**काव्यं ग्राह्यमलङ्कारात् सौन्दर्यमलङ्कारः**" इति कथयति। अस्याभिप्राये प्राधान्येन अलङ्कारस्य सौन्दर्यमित्यर्थः। अलङ्कारस्तु केवलं काव्ये विद्यमानस्य सौन्दर्यातिशयहेतव एव इति।

---

[1].□□.□□
[2].□□.□
[3].□□.□-2.1

5. **काव्यप्रकाशे मम्मटः**

वाग्देवतावतारः मम्मटाचार्यः अलङ्कारं लक्षयति –

उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित्।
हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः[1]।। इ□□□

6. **चन्द्रालोके जय□□□**

जयदेवस्तु अलङ्कारः हारादिसदृशाः इति वदन्नेव तादृशाः अलङ्काराः शब्दार्थयोः प्रसिद्ध्या वा कवेः प्रौढवशाद्वा मनोहारिणः भवन्तीति अभिप्रायं प्राकटयत्। □□□–

शब्दार्थयोः प्रसिद्धानां कवेः प्रौढवशेन वा।
हारादिवदलङ्काराः सन्निवेशे मनोहराः[2]।। इ□□□

7.**साहित्यदर्पणे कविराजविश्वनाथः**

आचार्यविश्वनाथः अलङ्कारं लक्षयति –

शब्दार्थयोरस्थिर ये धर्माः शोभातिशायिनः।
रसादीनामुपकुर्वन्तोऽलङ्कारास्तेऽङ्गादिवत्[3]।।

अलङ्काराः शब्दार्थयोः शोभावर्धकाः रसादीनां चोपकर्तारः इति। प्रसादादिगुणवत् अलङ्काराः न अपरिहार्याः इति।

□□□□□□□□□□□

अलङ्कारशास्त्रेऽस्मिन् शब्दार्थदृष्ट्या अलङ्कारास्त्रिधा विभज्यन्ते। 1.शब्दालङ्काराः, 2.अर्थालङ्काराः, 3.उभयालङ्काराश्च। तत्र अनुप्रास शब्दालङ्काराः। उपमारूपकोत्प्रेक्षादयः अर्थालङ्काराः। उभयालङ्कारे श्लेषो गृह्यते, शब्दालङ्कारत्वात्, अर्थालङ्कारत्वाच्च। एवं सत्सु अलङ्कारभेदेषु विशिष्य अनुप्रासालङ्कारस्वभावस्वरूपविषये अत्र विविच्यते।

अनुप्रासालङ्कारः

शब्दालङ्काराः यद्यपि बहवः वर्तन्ते तथापि अनुप्रासालङ्कारस्य विशेषता द्रष्टुं शक्यते। तत्र को नाम शब्दालङ्कारः इत्युक्ते उच्यते –

---

[1].□□.प्र-8.67
[2].□.□□.
[3].□□.□-10.1

ये व्युत्पत्त्यादिना शब्दमलङ्कर्तुमिह क्षमाः।
शब्दालङ्कारसंज्ञास्ते ज्ञेया जात्यादयोः बुधैः[1]।। इति।।

शब्दालङ्कारेषु अन्यतमः भवति अनुप्रासालङ्कारः। को नाम अनुप्रासः इति चेत् – भामहादारभ्य दीक्षितं जगन्नाथं च विहाय प्रायः सर्वैराचार्यैः अस्य निरूपणं कृतवन्तः। अनुप्रासो □□□ – **स्वरूपवर्णविन्यासमनुप्रासं प्रचक्षते।** अस्याभिप्राये अर्थभिन्नेऽपि अक्षरसादृश्यमपेक्षते। तस्य प्रयोगेण भाषायाः सौन्दर्यं वर्धते इति। यथा –

नानार्थवन्तोऽनुप्रासा न चाप्यसदृशाक्षराः।
युक्त्यानया मध्यमया जायन्ते चारवो गिरः।। इति ।।

दण्डिनः मते तु –

वर्णावृत्तिरनुप्रासः पादेषु पदेषु च।
पूर्वानुभवसंस्कारबोधिनी यद्यदुरता।। इति ।।

उद्भटस्य मते□□–

सरूपव्यञ्जनन्यासं तिसृष्वेतासु वृत्तिषु।
पृथक् पृथगनुप्रासमुशन्ति कवयः सदा[2]। □ □□□□

वामनस्य मते तु –

"**शेषः सरूपो अनुप्रासः**" □□□□ अर्थात् पदमेकार्थमनेकार्थञ्च स्थाननियतं तद्विधमक्षरं च शेषः। स्वरूपोऽन्येन प्रयुक्तेन तुल्यरूपोऽनुप्रासः।

रुद्रटस्य □□□□–

एकद्वित्रान्तरितं व्यञ्जनाविवक्षितस्वरं बहुशः।
आवर्त्यते निरन्तरमथवा यदसावनुप्रासः[3]।। इति ।

मम्मटस्य मते तु –

मम्मटस्तु सर्वान् मनसि निधाय - **"रसानुकूलवर्णनिबन्धनं वर्णसाम्यञ्च अनुप्रासो"** भवतीति प्रत्यपादयत्। यथा - **"वर्णसाम्यमनुप्रासः"** इ□□

एवं भामहादारभ्य अस्य अलङ्कारस्य उत्तरोत्तर विकासो जातः। मम्मटेन तस्य स्वरूपसंस्थानमपि कृतम्। मम्मटानन्तरं प्रायः कस्यापि नवीनतत्वाविष्कारः न दृश्यते अस्मिन्नलङ्कारे।

---

[1] .□.□-1.344
[2] .□□.□-2.5
[3] .□□.□-2.8

अनुप्रासस्य लक्षणस्वभावादिनिरूपणे बद्धदृष्टिषु साहित्यशास्त्रविद्वत्प्रवरेषु प्रथमाग्रगण्याः भवन्ति भामह-मम्मट-विश्वनाथ-ज[illegible]

अनुप्रासस्य भेदाः

1. **काव्यालङ्कारे भामहः -**

भामहेन अनुप्रासे भेदत्रयं प्रतिपादितम्। ते च – ग्राम्यानुप्रासः, नानार्थवदनुप्रासः, लाटानुप्रासश्चेति।

ग्राम्यानुप्रासः -

ग्राम्यानुप्रासमन्यत्तु मन्यन्ते सु[illegible]
[illegible]

लाटानुप्रासः -

लाटीयमप्यनुप्रासमिहेच्छन्त्यपरे यथा।
दृष्टिदृष्जिसुखां धेहि चन्द्राश्चन्द्रमुखोदितः ।।

2. **विश्वनाथस्य मते -**

अनुप्रासस्य सामान्यलक्षणविषये विश्वनाथस्य म[illegible] प्राधान्यमावहति। "अनुप्रास शब्दसाम्यं वैष्यम्येऽपि स्वरस्य य[illegible] रसाद्यनुगतत्वेन प्रकर्षणेनानुप्रासयति तस्य वचनान्तरेण [illegible] स्वरभेदे [illegible] प्रधानगुणव्यञ्जनावृत्तिः अनुप्रासं कल्पयतीति अवगन्तुं शक्यते। एवम्विधावृत्तिः एकव्यञ्जनस्य उत बहूना व्यञ्जनानां वा इति संख्याभेदं [illegible] एकवारावृत्तिर्वा [illegible] असकृदाबृत्तिर्वा इ[illegible] आवृत्तिक्रममनुसृत्यापि अनुप्रासस्य अवान्तरभेदाः संभवन्तीति तत्तदाचार्याणां लक्षणानुशीलनेन अवगम्यते। पञ्चभेदाः यथा -

छेकानुप्रासः -

" [illegible] व्यञ्जनसङ्खस्य सकृत्साम्यमनेकधा" [illegible]

वृत्यनुप्रासः -

अनेकस्यैकधा साम्यमसद्व्वाक्यलेकधा।
एकस्य सकृदप्येष वृत्यनुप्रास उच्यते।।

श्रुत्यनुप्रासः -

उच्चार्यत्वाद्यदेकस्य स्थाने [illegible]
सादृश्यं व्यञ्जनस्यैव श्रुत्यनुप्रास उच्यते।।

अन्त्यनुप्रासः -

व्यञ्जनं चद्यथावस्थं सहायेन स्वरेण

आवर्त्यतेऽन्त्ययोज्यत्वादन्त्यानुप्रासः ए

लाटानुप्रासः -

"शब्दार्थयोः पौनरुक्तं भेदे तात्पर्य्यमात्रतः"।

3. **मम्मटस्य मते -**

मम्मटस्य मते तु भेदत्रयमुक्तम् ।

छेकानुप्रासः – "सोऽनेकस्य सकृत्पूर्वः"।

वृत्यनुप्रासः – "एकस्याप्यसकृत्परः"।

लाटानुप्रासः – "शब्दस्तु लाटानुप्रासो भेदे तात्पर्यमात्रतः"।

4. **जयदेवस्य**

जयदेवस्तु अनुप्रासास्य पञ्चभेदाः प्रदर्शिताः। ते च –

छेकानुप्रासः

स्वरव्यञ्जनसंदोहव्यूहा मन्दोहदोहदा।

गौर्जगजग्रदुत्सेका छेकानुप्रास

वृत्यनुप्रासः

आवृत्तवर्णसम्पूर्णवृत्तानुप्रासरवद्वचः।

अमन्दानन्दसन्दोहस्वच्छन्दास्पदमन्दिरम्॥ 7.१

टानुप्रासः -

लाटानुप्रासभुर्भिन्नाभिप्राया पुनरूक्तता।

यत्र स्थानन्न पुनः शत्रोर्गर्जितं तज्जितं जितम्॥

स्फुटानुप्रासः -

श्लोकस्यार्धे तदर्थे व वर्णावृत्तिर्यदि ध्रुवा।

स्फुटानुप्रासता

अर्थानुप्रासः -

उपमेयोपमानादावर्थानुप्रास इष्यते।

चन्दनं र□□गोविन्द चरणद्वन्द्ववन्दनम्।।

□□□□□□

एवञ्च अनुप्रासालङ्कारस्य विश्लेषणेन अस्माभिः ज्ञातुं शक्यते यत् – अलङ्काराः काव्यस्य शोभां वर्धयन्ति। अनुप्रासालङ्कार प्रयोगेन काव्यस्य रस-पोषणं तु करत्येव, □□□ □□ □□□□□काव्यस्य वाह्यसौन्दर्यं द्विगुणितं कृत्वा □□□□□□चित्तमपि आकर्षति। □□□ अनुप्रासं प्रति भोजस्य □□□□□□□ वर्तते। तस्य □□□□□□वाग्देवी पूण्यवशात् प्रतिभाशालीनां क□□□□ चित्तेषु अनुप्रासं □□□□□□ –

□□□□□□ वाग्देवी प्रतिभावतः क□□

पुण्यैरमुमनुप्रासं ससमाधिनि चेत□[1] □1

अनुप्रासः काव्यस्य शोभावर्धने त□□समर्थास्ति यथा ज्योत्स्ना चन्द्रमायाः त□□ □ लावण्यम् अङ्गनायाः कान्तिवर्धनं करोति । □□□ काव्ये अनुप्रासालङ्कारस्य लेशमात्रमपि गुम्फनं भवति चेत् उपमाद्यलङ्काररहितकाव्यमपि सुशोभितं भव□□ -

□□□ ज्योत्ना चन्द्रमसं यथ□ लावण्यमङ्गनाम् ।

अनुप्रासस्तथा काव्यमलङ्कर्तुमयं क्षमः[2] □□

उपमादिविमुक्तापि राज□□काव्यपद्धतिः ।

यद्यनुप्रासलेशोऽपि हन्त तत्र निवेश्यते[3] **।।**

अनया रीत्या अनुप्रासालङ्कारस्य स्वरूपस्वभावविषये संक्षिप्ततया यथाशक्ति प्रतिपादितं वर्तते। विषयबाहुल्यात् केवलं लक्षणानि एव प्रदत्तानि।। इति शम् ।।

1.□प्र-2.73

2.□प्र-2.76

3.□प्र-2.106

सन्दर्भग्रन्थसूची –

1.**अग्निपुराणम्** -- आनन्दाश्रम संस्कृतग्रन्थावली, पू, 1990

2.**काव्यादर्शः** – श्रीकमलमाला ग्रन्थमाला कार्यालय, बुला 1988.

3.**काव्यालङ्कारः** -- चौखम्बा संस्कृत प्रकाशन, व

4.**काव्यदीपिका** – चौखम्बा संस्कृत प्रकाशन, व

5.**चाणक्यनीतिः** – संस्कृत सीरीज पुस्तकालय, दिल्ली।

6.**शृङ्गारप्रकाशः** – चौखम्बा संस्कृत पब्लिसर्स, दिल्ली।

7.काव्यप्रकाशः – चौखम्बा संस्कृत प्रतिष्ठान, वाराण

8.चन्द्रालोकः – चौखम्बा संस्कृत प्रकाशन, वाराण

9.चन्द्रालोकः – चौखम्बा संस्कृत पब्लिसर्स, दिल्ली।

10.नाट्यशास्त्रम् – चौखम्बा संस्कृत प्रतिष्ठान, वाराण

-------------- 0 ---------------

मन्दस्मितरामायणकाव्ये रीतिविचारः

□□.श्रीकान्तः
शोधच्छात्रः, साहित्यविभागः
राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

□□□□□

[□□□□□: श्रीनिधिस्वामी सुमधुरसुललितरामकथामाश्रित्य मन्दस्मितरामायण□□□ काव्यपुष्पं सरस्वतीसमाराधने समर्पयामास । संस्कृतालङ्कारग्रन्थेषु प्रतिपादिताः महाकाव्यस्य प्रायश□ सर्वेऽपि विभावाः अस्मिन् काव्ये सहृदयपाठ□□ प्राप्तुं शक्यन्ते । अ□□□□□ □□□□ रामभक्तः □□□□□ □□□□ □रुविडैम□□□क्षेत्रे वसन् कविवरोऽयं मारीरोगेन पीडितः जीवतसंशयमापन्नश्च । अस्मिन् अवसरे उत्तमस्वास्थ्यं प्राप्तुमयं स्वेष्टदेवस्य श्रीरामचन्द्रस्य स्तुत्या श्रीरामचतुःश्लोकी इति शार्दूलविक्रीडितच्छन्दसा काव्यं रामायणकथ□□□□□□ □□□□□□□ □ □□□□□ □□□□□□□□□□क्तोऽभूत् । एवं रामकथाप्रसङ्गे तस्य दृढानुरक्तिः स्पष्टतया प्रतीयते । मन्दस्मितरामायणं विहाय अनेन कविना मञ्जूरामायणमिति काव्यमपि प्रणीतम् । □□□□□□□□ □□□-अयोध्या- अरण्य-किस्किन्धा-सुन्दर-युद्ध-प्रकीर्णकाण्डानि भवन्ति, तथैव□ काण्डस्थाने स्पन्दाः अस्मिन् काव्ये लभ्यन्ते । अस्मिन्नेव मन्दस्मितरामायणे रीतिविचारः □स्मिन् शोधपत्रे क्रियते ।]

रीतिशब्दः रीङ्–गतौ धातोः स्त्रीलिङ्गे भावे क्तिन् प्रत्यये निष्पन्नः । रीतिः गमनमिति शब्दौ तुल्यार्थकौ भवतः । वामनेन पदबन्धगतिमनुसृत्य रीतीनां नाम निर्दिष्टम् । तत्र शब्दगतिः अर्थगतिश्च वामनेन विवक्षिते । आनन्दवर्धनस्तु माधुर्यादीनां त्रयाणां शब्दगतौ सङ्घटनां पृथगुक्तवान् । अर्थगतिमाश्रित्य रसानुकूलं गुणविभागं निरूपितवान् । विद्यानाथस्तु गुणप्रकरणे वामनोक्तान् विंशतिगुणान् यद्यपि निरूपितवान्, तथापि लक्ष्येषु गुणत्रयप्रयोग एव तस्यापि इष्ट इति प्रतिभाति । भेदकरणे विशेषाभावोऽपि वामनमते काव्ये का वा रीतिः ? इति □□□□□□ क्रियते । ध्वनिकारमते तदुदाहरणं कस्मिन् गुणे अन्तर्भवतीति पृथक् निरूप्यते ।

(1) वेदर्भी रीतिः

"मा मा भीतिर्भवतु भवतां भद्र" मित्युक्तिरम्यं
मायापेतं सदसि मरुतां यत्स्मितं मन्दमासीत् ।
मुग्धं तत्किं वसति च मुखावासने स्वानने ते
स्निग्धं मह्यां दिशतु तदिदं भद्रपूर्णामभीतिम् ॥[1]

अत्र नारायणेन अभयप्रदानमुपवर्णितम् । प्रथमपादे "मा मा भीतिर्भवतु भवतां भद्रम्" इति भकारस्य चतुः प्रयोगेन गाढबन्धत्वमोजसोऽनुकूलं दृष्टम् । तथैव द्वितीयपादे बन्धस्य शैथिल्यमपि दृष्टं येन प्रसादगुणस्यापि एतदुदाहरणं भवति । "भीतिर्मा भवतु" □□□ दयावीरस्याभिव्यक्तेः कान्तिः अर्थगुणः । एवम् ओजसः प्रसादस्य च सम्प्लवाद्बन्धः गुणवत्तर इति वैदर्भीरि□□□□□□□□□□□

त्राता तस्य गजस्य किं नु तनयो जातो मयाऽयं पुमान्
आदावेव गजाधिरोहणविधावानम्य पृष्ठे धृतः ।
सानन्देन गजेन सन्नयनं तेनेति वाचा पितु-
र्यन्मन्दस्मितमानने तव बभौ तत्किन्न्विदं राजते ॥[2]

अत्र "त्राता तस्य गजस्य" इति पादे पृथक्पदत्वं माधुर्यं सपदि अर्थव्यक्तेः अर्थगुणः अर्थव्यक्तिः सानन्देन गजेन इत्यत्र अपारुष्यं शरीरं सौकुमार्यं शब्दगुणः एवमादीनां गुणानां सम्प्लवात् पूर्ववद्वैदर्भीरीतेः इदमुदाहरणम् ।

एवं मन्दस्मितरामायणस्य बालस्पन्दे 49 श्लोके, अयोध्यास्पन्दे 12 श्लोके, अरण्यस्पन्दे 3,13,16 श्लोकेषु च वैदर्भीरीतिः एवं निरूपिता ।

2. □□□□□ □□□□ - ओजोगुणविवृतौ वामनेन ओजसः पञ्चप्रकारत्वं निरूपितम् । □□□ -

पदार्थे वाक्यरचना वाक्यार्थे च पदाभिधा ।
प्रौढिः व्याससमासौ च साभिप्रायत्वमस्य च ॥[1]

---

[1] म.स्मि.रा - बा.स्प . श्लो.5

[2] म.स्मि.रा.बा.स्प . - श्लोकः 10

अस्याः कारिकायाः अर्थः जगन्नाथेन रसगङ्गाधरे एवं निरूपितः – "एकस्य पदार्थस्य बहुभिः पदैरभिधानं बहूनां चैकेन तथैकस्य वाक्यार्थस्य बहुभिर्वाक्यै-र्बहुवाक्यार्थस्येक- वाक्येनाभिधानं विशेषणानां साभिप्रायत्वं चेति पञ्चविधमोजः।"[2]

विष्णो पङ्क्तिरथस्य पार्थिवमणेः पुत्रत्वमेत्यावनौ
कुर्याः पङ्क्तिमुखस्य राक्षसपतेः दुष्टात्मनस्संहृतिम्।
दान्तीं पङ्क्तिमहो प्रदार्श्य विबुधैरित्यर्थितः सादरं
त्वं तां पङ्क्तिमदर्शयन्यदकरोर्मन्दस्मितं पातु तत्॥[3]

शरणागतान् देवान् दृष्ट्वा अस्मिन् श्लोके हरिः हसित्वा अभयं दत्तवान्। मन्दस्मितमकरोदिति पदार्थेनैव वक्तव्ये अर्थे सिद्धे तृतीयचतुर्थपादयोः रचनं व्यासः। एवं "दान्तिं पङ्क्तिं प्रदर्श्य" इति स्मितविशेषणेन भगवति हास्यरसोऽप्यभिव्यक्तः। प्रायशो रामः स्मितकाले दन्तान्न दर्शयति एतेन रावणवधः सुलभसाध्या इति अर्थस्सूचितः।

"प्रदार्श्य" इति अपूर्वः प्रयोगः। प्र-इत्युपसर्गपूर्वकात् दृशिर्–प्रेक्षणे इति धातोः "[illegible]" (3/1/26) [illegible]-प्रत्यये, "समानकर्तृकयोः पूर्वकाले" (3/4/21) [illegible] णिजन्तात् सनाद्यन्तधातोः क्त्वा-प्रत्ययः। ततः प्र इति उपसर्गेण "कुगतिप्रादयः" (2/2/18) इति समासः। ततः क्त्वा प्रत्ययस्य ल्यबादेशः "णेरनिटि" (6/4/51) [illegible] क्त्वा-प्रत्ययस्य वलादि "आर्धधातुकस्येड्वलादेः" (7/2/35) इति इडागमः अन्तरङ्गकार्यं प्रथमं करणीयम्। ततो बहिरङ्गः ल्यबादेशः। तथापि अकृते ल्यपि इडागमः भवत्येव अन्तरङ्गकार्ये कर्तव्ये असिद्धं बहिरङ्गमन्तरङ्गे इति इडागमः भवत्येव। किन्तु "अदो जग्धिर्ल्यप्तिकिति" (2/4/36) इति सूत्रे जग्धिविधौ ल्यप्-ग्रहणात् "अन्तरङ्गानपि विधीन् बहीरङ्गो ल्यब् बाधते" इति ज्ञापकसिद्धपरिभाषा तेनैव सूत्रेण भवति। तया परिभाषया [illegible] "न क्त्वा सेट्" (1/2/18) इति क्त्वा-प्रत्ययस्य कित्वाभावात् लघू[illegible] भवत्येव। तेन प्रदर्श्य इत्येव भाव्यम्। उपधावृद्धिस्तु चिन्त्या। दीर्घाभावोऽपि युक्तपरत्वात्पूर्वाक्षरः गुरुः भवत्येव इति न च्छन्दोभङ्गोऽपि। "प्रदार्श्य" इति पाठस्तु चिन्त्य [illegible]

---

[1] काव्यालङ्कारसूत्रवृत्तिः - 3 अधि - 2 अध्याये - 1 सूत्रम्
[2] रसगङ् - प्रथमान - पृष्ठा 246
[3] म.स्मि .रा.बा.स्त . - श्लोकः -4

ततः साभिप्रायवचनोक्तेः ओजोगुणाभिव्यक्तेः गौडीयारीतिः । एवम् अयोध्यास्पन्दे 1,8 श्लोकयोः, अरण्यस्पन्दे 1, 6, 11, 17 श्लोकेषु अपि गौडिया रीतिरेव।

3. पाञ्चालीरीतिः - प्रायशः त्रिशताधिकश्लोकात्मके अस्मिन् काव्ये सप्तसु स्पन्देषु दृष्टानि गौडीया-वैदर्भीरीतिद्वयोदाहरणानि विहाय पाञ्चालीरीत्याः उदाहरणान्येव भवन्ति । □□□ बन्धे अर्थविधौ च सर्वेषु श्लोकेषु माधुर्यमेव दृश्यते। पृथक् पदत्वं उक्तिवैचित्र्यं माधुर्यम् इति लक्षणद्वयमपि सर्वेषु श्लोकेषु दृष्टम् । अर्थवैमल्यरूपप्रसादोऽपि दृष्टः । गुणानां सम्प्लवः गुणाय एवेति वामनेन स्वयं निरूपितत्वात् पाञ्चाल्यां प्रसादगुणस्य सम्प्लवोऽपि न दोषाय । यद्वा सम्प्लुतस्य प्रसादस्य अपारुष्यशरीरत्वेन ग्रहणमपि सङ्गतमेव । एवं काव्ये सर्वत्र पाञ्चालीरीतिरेव दृश्यते। स्पष्टप्रतिपत्तये द्वित्राणि उदाहरणानि यथा –

डोलायां जननी न सुप्त इति सा त्वां वीक्ष्य तूर्णं ततः
सौमित्रिं सविधे विधाय मधुरं गातुं प्रवृत्ता तदा।
साकूतं तव नाम यच्च वदने मन्दस्मितं मञ्जुलं
तद्वेदं वडुवूर्निवास ! भग□□□हे रामभद्र ! प्रभो ! □□[1]

अत्र सर्वेषु पृथक्पदत्वरूपं माधुर्यमर्थव्यक्तित्वरूपार्थगुणः माधुर्यञ्च स्पष्टं प्रतीयते । एवं बन्धेऽर्थे च न किञ्चिदपारुष्यमिति माधुर्यसौकुमार्योपपन्नमिति पाञ्चाल्याः रीतेः □□□□□□□□

मनागिव मनो मम त्वयि कृतं त्वया नीयते
परत्र तदपि प्रभो ! किमिति युक्तमेतत्तव।
अथ त्रिजटनीतितस्तदिति मन्दमेत्स्मितं
सुमन्दमभिपाति मामिह दयानिधे ! राघव ! □□[2]

अत्रापि माधुर्यरसे भक्तिरसे प्रतीयमाने माधुर्यानुकूलः पृथक्पदत्वादिरूपो बन्धः निबद्धः । अपारुष्यशरीरं सौकुमार्यं निबद्धम् । एवं पृथक्पदत्वमपि दृष्टमपि पाञ्चाल्याः रीतेः □□□□□□□□□

[1] म.स्मि .रा.बा.स्प . - श्लोकः -9
[2] म.स्मि .रा.अयो.स्प . - श्लो.9

मन्दो हासो मनुकुलपते ! मारुतस्यात्मजातो
मानातीतस्वरसललितो माननीयो महद्भिः ।
मन्दं कुर्वन् सपदि रजनीचारिणं नीलयोगात्
मह्यं भद्रं दिशतु सततं मङ्गलानां निदानम् ॥[1]

अत्रापि पूर्ववन्माधुर्यसौकुमार्यगुणयोः शब्दार्थोभयरूपयोः स्पष्टं दर्शनात्पाञ्चाल्याः [illegible]

"सोऽयं मारुतनन्दनो दशमुखे सिंहासनस्थे पुरः
[illegible]तासनस्तदुपरि प्राप्तस्थितिस्सम्बभौ ।"
इत्येवं सरमा सखी समवदत् सेति स्वजायागिरा
यन्मन्दस्मितमानने रघुपते तत्ते किमु द्योतते ॥[2]

विभीषणसखी सरमा सीतायाः हितं इच्छन्ती रावणसभायां हनूमतः वृत्तं सीतामुक्तवती । अत्रापि पूर्ववत् पृथक्पदत्वं स्फुटार्थाभिव्यक्तित्वमपारुष्यशरीरञ्च स्पष्टतया दृष्टमिति पाञ्चाल्याः रीतेः उदाहरणम् ।

[illegible]
वरानने स्थिरासनेऽयि राम ते रमेतराम् ।
तवाननं सरोरुहं दलं किलास्य राङ्कवं
मधुस्मितं मनोहरं ममान्तरस्तु सन्ततम् ॥[3]

अत्र माधुर्यगुणव्यञ्जकस्यानुनासिकरूपस्य नकारस्य बहुधा प्रयोगात् शब्दगतं माधुर्यं रामभक्तेः अभिव्यक्तेः अर्थगतञ्च माधुर्यमभिव्यक्तम् । एवं सौकुमार्यामपि उभयथा सङ्गतमिति पाञ्चालीरीतेः उदाहरणम् ।

एवं ध्वनिकारोक्तगुणेभ्यः माधुर्यादिभ्यः अभिन्नाः तन्मतानुकूला अपि अविरुद्धाः इति केचन श्लोकाः प्राचीनसम्प्रदायानुसरणनिरूपणार्थं सूचिताः । विस्तरस्तु सुधीभिः सुलभग्राह्य एव

---

1 तत्रैव - सु.रु . - श्लो.34
2 तत्रैव - श्लो.50
3 म.स्मि.रा.प्र.स्प. - श्लो.60

-- सहायकग्रन्थसूची –

1. मन्दस्मितरामायणम् श्रीनिधिग्रन्थमाला
   राष्ट्रियसंस्कृतविद्यापीठम्, तिरूपतिः, 2015
2. अनर्घराघवम् तेलुगुविश्वविद्यालयः, राजमहेन्द्रवरम्
3. [illegible] [illegible] हिन्दूविश्वविद्यालयः, वारा[illegible], 1970
4. तैत्तरीयोपनिषत् [illegible], [illegible], 1992
5. काव्यप्रकाशः भण्डार्कर ओरियण्टाल् रिसर्च इन्स्टूट्,
   [illegible] – 4, 1952
6. भक्तिरसामृतसिन्धुः [illegible], [illegible] – 3, 1991
7. [illegible] ओरियण्टाल् रिप्रिन्ट् कर्पोरेशन्स, दिल्ली, 1991
8. [illegible] परिमल पब्लिकेशन्स्, दिल्ली, 2012

------------ 0 ------------

वार्क्षिकसम्भारसंरक्षणे रामायणीयविचाराः

[illegible].पारमितापण्डा
सहाचार्या, प्[illegible]
जातीयसंस्कृतविश्वविद्यालयः
तिरुपतिः

अस्मान् परितो यदावरणं तदेव पर्यावरणपदेन संज्ञायते। एतानि तत्त्वानि सन्ति वायुजलपृथ्वी तेजोगगनाक्षानि पञ्चमहाभूतानि वनस्पतयः औषधयः जलचरखेचरसरीसृपकीटादयः जन्तवः पालितपशवः आरण्यकाः पशवः अन्यानि च निसर्गजातानि वस्तूनि। एतेषां सर्वेषां समष्टिः पर्यावरणं कथ्यते। संस्कृतसाहित्ये वैदिककालादेव पर्यावरणं प्रति चेतना दृश्यते। एतस्मात् कारणात् पर्यावरण उपादनि भूतवनस्पत्योषध्यादिषु वा नदीपर्वतादिषु वा जलवायुप्रभृतिषु वा तत्तदभिमानिदेवानां सदभावोऽभ्युपगतः। यथा सायणबादरायणवचनाभ्यां प्रमाणितं भवति।

ओषध्यामन्त्रीष्वपि चेतना एव तत्तदभिमानि देवतास्तेन तेन नाम्ना सम्बोध्यते। (ऋ.वे)
अभिमानि व्यपदेशस्तु विशेषानुगतिभ्याम्।(ब्रह्मसूत्र)

पर्यावरणचेतनाचित्रणस्य विषये ऋग्वेदात् आरभ्य आधुनिक कालाविरचित साहित्यं यावत्प्रसरति। महर्षि वाल्मीकि विरचित रामायणकाव्ये तु परम्परयाः अस्याः पूर्णपरिपाकः प्राप्यते। अस्य काव्यस्योपक्रम एव पर्यावरणचेतनायाः उपरि प्रतिभाति। कल कल निनादिनियाः तमसाया तटे सुखेन विहरतोः क्रौञ्चोकृतार्त्तनादव्यतिथहृदयस्य महर्षेर्वाल्मीकेः मुखनिःसृतः शोकः एव श्लोकीभावं सम्प्राप्तः इति रामायणकाव्योपक्रमः अलौकिकीं पर्यावरणचेतनां चित्रयति।

पर्यावरणचेतना चमत्कृतहृदयस्य भगवतो वाल्मीकेः निषादमुद्दिश्य शापवचनमेव रामायणकाव्यबीजत्वे स्वीक्रियते। यथा -

मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम् ॥ ([illegible])

प्रकृतिर्मनुष्यस्य परस्परं सम्बद्धौ एकस्य हानिः अपरस्य हानौ परिणमते इति तथ्यं सुविदितं भवति सर्वेषाम्। वस्तुतः लतावृक्षाऽक्षुपादीनां पत्रेषु प्राणवायुर्वासः, पर्यावरणप्रदूषणस्यापहारे च तेषां क्षमता वर्तते। पुनश्च वृक्षादिषु सत्क्षु जलवर्षणं भवति। येन कृषिकर्म सुष्टु प्रचलति। अन्यच्च वृक्षौषधिवनस्पतीनां जलसिञ्चनस्य प्रभूतक्षमता भवति, येन भूमेः आर्द्रता सुरक्षिता वर्तते। मरुत - भयं निवर्तते। उर्वरता च वर्धते। एवं सति प्रकृती मनुश्ययोः पारस्परिकसहयोगेनैव सर्वं सहयोगं, समञ्जसं सर्वं कल्याणमयं, सर्वं शिवात्मकं भवति। एतेषां वर्णनानामनुशीलनेन रामायणीया

वार्क्षिकसम्भार संरक्षणचेतना प्रकटीभवति। काव्येऽस्मिन् विविधौषदीनां लतानां पादपानां फलानां पुष्पानां मूलानां च विषदवर्णनं महर्षि वार्मीकेः वृक्षाणां संरक्षणे पर्यावरणचेतनां प्रमाणयति।

आदिकाव्यनाम्नाख्यातं रामायणकाव्यमिदं अक्षय वट खदिर पलास प्लक्ष परिभद्रक शमि प्रवृत्ति प्रदूषणनिरोधकानां वृक्षाणां वर्णनं पुनः पुनः करोति। एवमेव आम्र कदली जम्बू दाडिम्म धन्वननागवृक्ष नारिकेन नीपपनस बदरी बिल्वार्जुन मुचुकुन्द चम्पक वरणहिन्तालप्रभृतिवृक्षाणां फलाय प्रसिद्धानां नामुल्लेखं अनेकेशः करोति। अनेनैव प्रकारेण महर्षि रामायणकाव्ये असनको - विदारचिरविल्वतमाल ताल नागवृक्ष पणस पुन्नागवेत्रभव्य मधुक सालसिन्दुवर प्रभृति वृक्षाणां दारुदायिनां वर्णनं प्रस्तौति। वृक्षाणां वर्णनेन सहैवारविदोत्पलकदम्बकरवीर कर्णिकारकिंशुक कुन्दकुमुद कुरवक केतकी चम्पक चूर्णक नीलाशीक पद्मकपाटल वकुल बन्धुजीव मल्लिकालोध्र शिरीष सप्तपर्णकाशप्रभृति पुष्पपादपानां वर्णनं प्रस्तौति। पुष्पतरुणामुल्लेखेन सहैव लतानां अतीव मनोहर निवन्धनं करोति महर्षिः स्वकाव्ये। सुगन्धदायिनिम् अगुरु कर्पूर काश्मिरचन्दन-सौगन्धिकादित उपाणामपि वर्णनाम्प्राप्यते रामायणकाव्ये। अन्नदायिनां यवगो[illegible]-नीवारादीनामपि वर्णनं विद्यतेऽस्मिन् महाकाव्ये। इन्द्रजिता प्रयुक्ते ब्रह्मास्त्रे रामायणस्य युद्दकाण्डे हनुमता दिव्यौषधि पर्वतानदनवर्णन प्रसन्त्रे महर्षिवाल्मीकिः औषधिनां माहात्यम् प्रतिपादयति। येन रामायणाय वाक्षिकि सम्भारसंरक्षण विषयिका पर्यावरणचेतना रुचिरतया प्रकटीभवति ।

पुष्पफलछायादीनां तरुणां वर्णनं कुर्वन् महर्षिः चित्रकूटपर्वतवर्णन प्रसङ्गे उक्तमस्ति-

आम्रजम्बसनैर्लोध्रैः प्रियालैः पनसैर्धवैः।
अङ्कोलभव्यतिनिशैर्विल्वतिन्दुकवेषुभिः॥
काश्मर्यारिष्टवरणैर्मधुकैस्तिलैरपि ।
वदर्यामलकैनीपैर्वेत्रधन्वनबीजकैः॥
पुष्पवद्भिः पूलोपेतैश्छायावद्भिर्मनारमैः।
एवमादिभिराकीर्णःश्रियं पुष्यत्ययं गिरिः॥

एवमेव पञ्चवटीप्रदेशं वर्णयन् विविधवृक्षलतापुष्पादीनां वर्णनं प्रस्तौति। तद्यथा-

सालैस्तालैस्तमालैश्च श्चर्जैरःपनसैन्द्रुमैः।
नीवारैस्तिनिशैश्चैव पुन्नागैश्चोपरोभिताः॥
चूतैरशोकैस्तिलकैः केतकैः रपि चम्पकैः।
पुष्पगुल्मलतोपेतैस्तैस्तैस्तदूभिरावृताः।
स्यन्दनैश्चन्दनैर्नीपैः पर्णासैर्लकुलैरपि॥
धवाश्वकर्णखदिरैः शमिकिंशुकपाटलैः॥

एवमेव वाल्मीकिरामायाणे अरण्यकाण्डस्यैकादश सर्गे त्रिसप्तति तमे सर्गे पञ्चसप्ततितमे सर्गे च किष्किन्धाकाण्डस्य प्रथमसर्गे सप्तविंशतितमे सर्गे च युद्दकाण्डस्य चतुर्थे सर्गेऽपि विविध

वृक्षाणां वर्णनं प्राप्यते। एभिः वर्णनैः वाल्मीकेः वृक्षसम्बन्धिविषयिका पर्यावरणचेतना साधु प्रकटी भवति। औषध्यानयनायागते हनुमति हिमालयपर्वतस्थाः सर्वाः औषधयः अदृश्याः जाताः इति वर्णयन् महर्षिः औषदीनां कानिचित् लौकिकीं चेतनां चित्रयति। तद्यथा -

महौषध्यस्त्रतः सर्वाः तस्मिन् पर्वतसत्तम।
विज्ञायार्थिनमायान्तं ततो जग्मुरदर्शनम्॥

राम प्रत्यावर्त्तनकामनया ससैन्यपरिवारे भरते आगते भरद्वाजमुनिकृत दिव्यसत्कारप्रसङ्गे महर्षिवाल्मीकिः विल्वविभीतकाश्वत्थसरलतालतिलकादिवृक्षाणां चेतनां वर्णितम् भवति। उक्तं ---

बिल्वा मार्दङ्गिका आसन् शम्याग्राहा विभीतकाः।
अश्वत्था नर्त्तकाश्चासन् भरद्वाजस्य तेजसा ।
ततः सरलतालाश्च तिलकाः सतमालकाः।
प्रहृष्टास्तत्र सम्पेतुः कुब्जा भूत्वाथ वामनाः॥
शिंशपाऽऽमलकी जम्बूर्याश्चान्याः कानने लताः।
मालती मल्लिका जातिर्याश्चान्याः कानने लताः।
प्रमदाबिग्रहं कृत्वा भरद्वाजाश्रमेऽवसन्।

एवं प्रकारेण रामायणे वार्क्षिकसम्भारसंरक्षणे बहुधा निरूपिता वर्तते।

संस्कृतवाङ्मयस्य आदिकाव्यं भवति रामायणम्। रामस्य अयनं रामायणम्। रामो रमयतां वरः, रामो नाम जनैः श्रुतः इति चरमानन्ददायकः रामशब्दार्थः। श्रीरामेति परं जप्यं तारकं ब्रह्मसंज्ञकम् इति मुक्तिदायकार्थेऽप्रयुक्तः रामशब्दः। उपनिषत्सु उच्यते-

रमन्ते योगिनोऽनन्ते सत्यानन्दे चिदात्मनि।
इति रामपदेनासौ परं ब्रह्माभिधीयते॥

अत्र रामशब्दः सच्चिदानन्दरूपः, यत्र सर्वे जनाः प्राणिनः योगिनश्च रमन्ते। अयनं नाम मार्गः। एवं रामः अयते प्रतिपाद्यते अनेन इति रामायणम्। संस्कृतसाहित्यजगति रामायणम् उपजीव्य-काव्यरूपेण परिगण्यते। अस्य रचयिता आदिकविः वाल्मीकिः पुण्यश्लोकः मुनिः। भारतीयसंस्कृत्यां यथा सदामुखरः। सूर्यवंशस्य इतिवृत्तं रामजन्म सीताविवाहः पितृसत्यपालनार्थं वनगमनं रावणेन सीताहरणं सुग्रीवेण सह मित्रता वालिवधः सेतुबन्धनं भल्लूकमर्कटसैन्यैः सह रामस्य लङ्काप्रवेशः रामरावणयुद्धं रावणवधः रामाभिषेकश्चेत्यादयः रामायणस्य विषयवस्तु। रामकथा एकस्मिन् प्राचीने श्लोके इत्थं निबद्धा अस्ति। यथा-

पूर्वं रामतपोवनादिगमनं हत्वा मृगं काञ्चनं
वैदेहीहरणं जटायुमरणं सुग्रीवसम्भाषणम्।
वालीनिर्दलनं समुद्रतरणं लङ्कापुरी
पश्चाद्रावणकुम्भकर्णहननमेतद्धि रामायणम्॥

रामायणी कथा समग्रभारतम् एकसूत्रेण बध्नाति। रामादिवत् प्रवर्तितव्यं न रावणादिवत्॥

वस्तुतः वाल्मीकिरामायणमस्ति परमप्राचीनकाव्यम्। तस्मिन् समये मानवनिसर्गयोः धनिष्ठसम्बद्धः आसीत्। मानवः प्रकृतिक्रोडे विचरन् परमानन्दानुभवं आसीत्। अद्यत्वे स्थितिः, विपरीता सञ्जाताऽस्ति । येन नैकाः समस्याः प्रादुरभवन्। एतासां समस्यानां समाध वार्क्षिकसम्भारसंरक्षणे रामायणीय पर्यावरण चेतना अवश्यं परिशीलनीया जीवने च

सहायक ग्रन्थसूची

ऋग्वेदभाष्यम् - 5-29

ब्रह्मसूत्रे - 2-2-5

------------ 0 -------------

श्रीप्रफुल्लकुमारमिश्रमहोदयानां “तव निलये” इति काव्यस्य भावपक्षः

बलरामसेठी
शाधच्छात्र , साहित्यावभ
राष्ट्रियसस्कृताविश्वा , ितरुपात

“तव निलये” इति कवितागुच्छं पञ्चाशत् (५०) काव्यकलिकाभिः अलङ्कृतमस्ति । अत्र कश्चन मनुष्यः स्वनिलये शयनरतोऽपि मनसा समग्रं संसारं पुनः पुनः भ्रमति । अन्ततो गत्वा सः क्लान्तः जायते । कवेः स्मृतौ कदाचित् स्वप्नस्य विनिमयो भवति कदाचिच्चासौ स्वग्रामस्य कुम्भकारं नवघनं, नृत्यगुरुं गङ्गाधरञ्च स्मरति । तेनात्र समग्रं भुवनभावनं सख्याः रागरोषमण्डितं दृश्यते । एवं बहुविधभावनाः क्रोडीकृत्य कविः “तव निलये” इति कवितामाध्यमेन स्वदुःखं शमयति । पुरोवाचि कविः लिखति —

“यद्यपि शिश्नोदरपरायण आधुनिकमनुष्यः सुकुमारातिसुकुमारकाव्यं कर्तुं न प्रभवति तथापि केचन स्वप्नभुजः कवयः जञ्जालवहले घोरेऽपि पुष्पस्य सुरभिं कोकिलस्य कुहुतानमनुसरन्ति । नास्तीदानीं कालिदासस्य कालः येन प्रकृतिविभवचारुणा प्रफुल्लितः कश्चित् कविकर्मणि व्यापृतः स्यात् । प्रतिदिनं ये मिलिताः ये च दृष्टाः, यच्च श्रुतं तेन मनो व्यथते मोमुद्यते वा, तत्सर्वं कथञ्चित् सुरगिरा प्रतिभाति काव्यरूपेणोपकल्प्यते । तथा च अस्माकं जीवनं चिनांशुकमिव वायुप्रवाहितमस्ति । जीवनस्य गतिः नैकमुखत्वात् चिन्त्यते — क्व गच्छामः ? किं चिन्तयामः ? का वाऽस्माकं स्पृहा ? इति । सर्वं भिन्नरूपं काव्यकदम्बस्य विजयरूपेण अवतीर्य अभिनवरूपं दर्शयति ।”

अनया कवेरुक्त्या स्पष्टमिदं प्रतिभाति यत् कविः “तव निलये” इति काव्येऽस्मिन् स्वजीवनस्य गतिपथे अनुभूतानां पदार्थानां विश्लेषणं कर्तुं प्रयतते । असौ समाजस्य विषदग्धविषादं वर्णयति । एवं काव्यस्य प्रत्येकं शीर्षकं जीवनदर्शनं ददाति । अत्र विद्योतितानि शीर्षकाणि यथा — “तव निलये”, “चलचञ्चलम्”, “तरलजडता”, “यन्त्रदानवः”, “दर्पणसमुद्रम्”, “सा चपला”, “यात्रा”, “अपेक्षमाणा शबरी”, “मनोरमा”, “मञ्जरी”, “स्वप्नमञ्जरी”, “स्वप्नविनिमयः”, “कोमलस्य का कथा”, “हा हताशा-२”, “धूमवितानम्”, “श्मशाधूमम्”, “सारिका”, “काकलं मुधा”, “विस्मृताऽपि सा कथा”, “रोमन्थनम्”, “तुच्छायते”, “विषकृमी”, “छाया”, “दीपस्तम्भः”, “धर्मगृध्रः”, “कोऽसौ रामः”, “तथापि”, “निरुद्धमन्दिरम्”, “मांसपुष्पम्”, “रहसि किं वदसि ?”, “रोहतकस्मृतिसञ्चिका ”, “कर्णपुरो न

हि चर्मपुरोऽयम्", "अभिनन्दनम्", "गणतन्त्रम्", "वाणीविहार:", "गोतीर्थाष्टकम्", "श्वशुरस्य गृहम्", "जामाता दशमो ग्रह:", "गुरुर्गङ्गाधर:", "कुम्भकारनवघन:", "खारवेल:", "श्वेतकेतु:", "क्लान्त: श्वेतकेतु:", "पक्वकेश: श्वेतकेतु:", "मरुतीर्थे श्वेतकेतु:" इति । एतेषु शीर्षकेषु केषाञ्चन स्थालीपुलाकन्यायेनात्र विचार: प्रस्तूयते ।

(१) **"तव निलये"** इति शीर्षकाङ्किते पद्यबन्धे कवि: प्रियतमाया: शुभसूचक-मङ्गलान्वित-निलयस्य प्रकल्पनां करोति, यत्र मङ्गलतारका नवदलश्यामललतिकया साकं लसाति । एवम्भूते निलयेऽस्मिन् कवे: मनसि नलिनीवनस्य भ्रमो जायते । तत्र तस्य मन: रञ्जितं हृदयमुल्लसितं भवति । किन्तु कदाचित् हस्तामलकम् आकाशकुसुमायते कदाचिच्च आकाशकुसुमं हस्तामलकायते । अर्थात् कदाचित् तत्र प्रणयपूर्णता दृश्यते कदाचिद्वा प्रणयशून्यता ।

(२) **चलचञ्चलम् —** अस्मिन् पद्योद्याने प्रणयस्य गतिवृत्ति: कथमस्थिरा अस्ति प्रणयप्रयाणं कथं चलचञ्चलमस्ति इति तदुदाहरणपुरस्सरं कविना प्रस्तूयते । "क्षणे रुष्ट: क्षणे तुष्ट:" इति सिद्धान्तानुसारेण प्रियतमाया: प्रणये कथमस्थिरता वर्तते तस्योल्लेख: क्रियते । कविना प्रणयप्रयाणं पवनपोतेन सह उपमीयते । यत्र कदाचित् स्थिरता, कदाचिच्च अस्थिरता भवति । पवनस्य प्लवने वास: कष्टसाध्य: कल्प्यते । आकाशे प्रात:काले प्रदोषसमये च तारकाणां तरणं जञ्जालकं जालं जनयति । स्पष्टतया तासां प्रतीतिर्न भवति । कदाचित् तपनस्य प्रखरं तेज: तारयति, कदाचिच्च मारयति । एवं तस्य लपने कथं वा वन्दनं स्यादिति कवि: संशयं करोति । मरुभूमौ मरुयात्रिण: पथप्रदर्शनार्थं मार्गदर्शकस्य मर्दलनादचाञ्चल्यमपि कविनाऽत्र स्मर्यते । धरणी स्वधारणार्थं धारकं धरतीति अनुपमचिन्तनं कवेरत्र प्राप्यते । आकाशे रात्रौ तारकानां तोरणं कल्प्यते । तत्तोरणं दृष्टा पथिकानां मार्गानुगामित्वं जले स्थले च सूच्यते । किन्तु अत्र तारकाणां चलचञ्चलता स्पष्टीभवति । कविरत्र आकाशं समुद्रत्वेन प्रकल्प्य तत्र सन्तरणेन उत्तरणञ्च विभाव्यते । तारका: फेनायिता: प्राप्यन्ते । एवमेव मण्डलनृत्ये चर्चरीगाने चलचञ्चलचालनं प्रतिपाद्यते । पुनरपि गगने चपलाया: प्रपलायनं चलोल्लसद्भासनमुल्लिख्यते । एवं प्रकृते: नैकानां वस्तुनां चाञ्चल्यं प्रदर्श्य कविना अन्ते मानसाभिलाषचाञ्चल्यमपि उपस्थाप्यते। यथा —

अभिलषति विषयविलासे
अभिलापस्य विजयहासभाषिता
चिन्तिते अभिमन्थिते
क्रन्दति यत् क्रन्दनाभिलाषिते ।। (तव निलये, चलचञ्चलनम् - श्लो.५)

(३) **तरलजडता —** तरले वस्तुनि जडतायाः प्रकल्पना, अस्य काव्यस्य प्रमुख्यं लक्ष्यं भवति । परमे व्योमनि राजहंसाः सन्तरन्ति । तत्र रात्रौ तारकाः, कदाचिदुल्काप्रवाहः, मनोभीतिहरा प्रकाशस्य वन्या च दृश्यन्ते । द्वौ हंसौ तत्र विचरन्तौ नीडरचनां कर्तुं प्रयत्नं कुरुतः । किन्तु ताराविह्वलिते छायापथके (आकाशगङ्गायां) महाशून्ये क्व नीडरचना ? इति कविना विभाव्यते । उच्यते च तेन –

हंसौ तरतश्चाम्बरार्णवे
पुलकितौ तौ व्योमविहारे
महाशून्ये क्व नीडरचना
ताराविह्वलिते छायापथके । (तव निलये - तरलजडता, श्लो.२)

कारणशरीरे प्रभातवाताहतकल्लोलिता सुगन्धकलिका हसति इति विकल्प्य तत्र कोऽसौ तस्याः हासे कारणं स्यादिति मनसि प्रश्नमुत्थापयति कविः । मनसि वैराग्ये समागते काऽपि दीप्तिस्तत्र प्रकटिता भवति । किन्तु क्षणेन सा दीप्तिः कुत्रापि फुत्क्रियते । हृदये प्रवणतायाः फुल्लता समागच्छति । कदाचित् लसति, विलसति, समुल्लसति च सा प्रफुल्लितभावना दोलायिते पथि जीवनतरणीमाध्यमेन तरितुं प्रयतते । किन्तु अहो दुर्भाग्यं तत्र मानसे तरलजडता व्याप्नोति । एवं नैकाः भावनाः कवेरस्मिन् काव्ये प्रघटीकृताः । मानसं तु सर्वथा तरलमेवेति कल्प्यते । तत्र मानसजडता तरलजडता एव भवति ।

(४) **यन्त्रदानवः —** काव्यखण्डेऽस्मिन् रेल्ययानस्य समीचीनं वर्णनं कृत्वा कविः किमपि अपूर्वं जीवनदर्शनं दातुं प्रयतते । अयं यन्त्रदानवः रेल्यफलकमाध्यमेन यदा गच्छति, तदासौ तत्फलकं क्रमशः ग्रसतीति कवेरनुचिन्ता अपूर्वा । धूमं फुत्कृत्य गमनावसरे तदन्तराले सर्वं सः विस्मरति । नव पन्थानं पश्यति । सधीरं च चलति । तत्र तत्र रेल्यनिःस्थानेषु नैके यात्रिणः याने प्रविशन्ति, अन्ये च अवतरन्ति । अवतीर्य स्वग्रामाभिमुखं गच्छन्ति । प्रविष्टाः यात्रिणः तत्र वाचालालापैः कदम्बं सृजन्ति । नैकाः स्मृतयः प्राप्यन्ते । किन्तु अवतीर्य गमनादनन्तरं ताः क्रमशः मलयमारुतेन प्रविलीनाः भवन्ति । यानं बहुदूरं गच्छति । मार्गे कोकिलालापं शृणोति । कन्दलीकन्दलानां कल्लोलितां स्थितिं पश्यति । किन्तु कालान्तरे सर्वं तेन यानेन विस्मर्यते । एषा स्थितिः सर्वेषां जीवनेऽपि भवति ।

(५) **दर्पणसमुद्रः —** कविः काव्येऽस्मिन् दर्पणे आत्मानं दृष्ट्वा प्रेमिकायाः पूर्वस्मृतिम् आकलयति । दर्पणे तस्याः मुखम्, स्नानागरे तस्याः स्नानम्, स्नानेन तद्देहस्पर्शः, तेन रोमाञ्चः इत्यादयः नैके विषयाः स्मर्यन्ते । स एव दर्पणः स्मृतिलहरिकाभिः समुद्रवत् उद्भासितो भवति । एवमकस्मात् शयिते स्वप्ने समुद्रफेनप्रसारणवत् सर्वाः स्मृतयः लीनाः भवन्ति । अत्र

मञ्जुल: समुद्रोऽपि लीनायते । कवि: महाशून्ये भूमायां रथ्यामध्ये गच्छति । तत्र प्रेमिकाया: स्वरं शृणोति । असौ स्वन: शब्दहीन: इति कविना प्रतिपाद्यते । अस्मिन्सन्दर्भे काव्यस्यास्य भावपक्षविचारावसरे अधिका चर्चा करिष्यते । नायिकाया: प्रगल्भतानदीप्रवाहे स्नानं कृत्वा कवि: आत्मन: शरीरं प्रणयस्य तटप्रदेशे छादयति । तटे शयनरतस्य कवे: मानसे समुद्रतटस्य पाण्डुसिकता: नायिकाया: कपोलवत् तथा च समुद्रलहरिका जघनवत् इत्यनुचिन्तनं समागच्छति। लवणसागरतीरे कवे: उद्वेलितं मानसं मधुरस्यान्वेणं वृथा इति स्पष्टीकरोति । परन्तु तत्र मधुरताऽस्तीति अभिनयप्रदर्शनमेव सारो भवति । लहरिका शिरसि सन्तोल्य विस्तार्य च आत्मन: शिरस्ताडनं भूयोभूय: करोति । कविर्वदति एषा नायिकाया: उन्मादनामेव परिमापयति ।

पुन: अकस्माद् दर्पणायिते सागरे अथवा सागरायिते दर्पणे दर्पग्राम: चूर्णो भवति, भवनं शून्यं जायते, हृदयकुञ्जे गुम्फितं नायिकाया: चित्रं समुद्रस्य बुद्बुदफेनमालिकायां प्रतिफलितम् अवलोक्यते । अत्र कवि: प्रार्थयति —

यावच्छक्यं समग्रं जीवनमवलोक्य
दर्पणकमाकाशस्य दृश्यं सङ्गोपय,
समुद्रे विस्तारय, लोकं तारय । (तव निलये, समुद्रदर्पण: - ३/२)

अत्र सङ्कुचितहृदयस्य विस्तारार्थं कविना उपदेश: प्रदीयते । लघुदर्पणस्य आकाशरूपेण समुद्ररूपेण च वैश्वीकरणम् आविष्क्रियते । अनेनैव संसाररक्षणं भविष्यतीति तस्यानुचिन्ता । अयं दर्पण: कदाचित् प्रणयस्य शृङ्गारिकचित्रमपि प्रदर्शयति । अतीतस्य प्रणयजव्रणाङ्गानि दर्शयति, दन्तनखच्छेदनस्य स्मृतिं जनयति । तत्र व्रणेषु समागतानि कृष्णचिह्नानि गोपनमिलनविच्छेददिनानि सूचयन्ति किम् ? इति अर्थापत्त्या कविना विचार: प्रस्तूयते ।

अन्ते कवि: वदति —

स्थिते त्वयि न कोऽपि रमते,
त्वदभावे प्रविशन्ति, दर्पणविहीनेऽनिश्चिते
भविष्यत्सुखस्वप्ने समाधौ ।

अर्थात् नायिकायां स्थितायां रमणार्थं प्रेम कदाऽपि नोत्पद्यते । परन्तु यदा तस्या अभावो भवति तदा जीवनं भविष्यत्सुखशून्यं जायते । केवलं स्वप्न एवावशिष्यते । एवं दर्पणोऽपि लीनो भवति । तत्र तत्प्राप्ते: अनिश्चितता समाधिरेवेति कवे: कल्पना । वस्तुत: “समुद्रदर्पण:” इति काव्यं कदाचित् कवे: समुद्रतटे उपविश्य तत्र लहरिकासु प्रियतयामा: अतीतघटनाया: स्मृतिदर्शनं अथवा दर्पणस्य पुरस्तात् स्थित्वा तत्र स्वप्रणयजीवनस्य भावनासमूहानुचिन्तनं प्रसादयति ।

एवं "**सा चपला**" इति शीर्षके तपनतापेन हस्ते करकाया: विलीनता, गगने इन्द्रधनुषि सहस्रगव्यूते: परिव्याप्तौ वितानमाकलय्य तत्र प्रासादं निर्माय नायिकाया: सुखशयनम्, प्रियतमस्य नाम्न: आम्रेडनेन मनसि जात: सन्ताप:, जीवनसागरे तरणीतारणावसरे हृदि उत्पन्न: झञ्झावाद:, जलधौ उत्तुङ्गतरङ्गभङ्गे मुहु: मुहु: प्रियतमाया: वाक्यस्फुरणम् इत्यादय: विषया: कवे: प्रकृतिप्रेम, तत्र प्रकृतौ च प्रणयस्य कल्पनां प्रघटीकुर्वन्ति ।

"**यात्रा**" इति कवितायां कविजीवनयात्रायां सूर्यास्त: ; अन्धकारे प्रियतमाया: कायाच्छवि:; जले, स्थले, अन्तरिक्षे, दिवसे, रजन्याञ्च तस्या: अन्वेषणम् ; कायाच्छायाया: मायां निवार्य तत्समीपे सत्यस्य कृते प्रार्थना, परन्तु तत्र मायाया: इतोऽपि दीर्घता, सत्यस्य चौर्यम् इत्यादय: विषया: उल्लिखिता: । अत्र मृषाकपि: कवे: मानसनायक: । य: नायिकया छलायित:। अयं नायिकाया: प्राप्त्यर्थं दुर्गमं दुर्गगहनं मनोमन्दिरं प्रवेष्टुकामोऽस्ति । परन्तु मायाकवलित: रथ्यां विस्मरति । कविनोच्यते —

सत्यस्य स्वरूपं चोरितं छलायमानेन मृषाकपिना
तदर्थं दुर्गमं दुर्गगहनं मनोमन्दिरं प्रवेष्टुकाम:
रथ्यां विस्मरति । (तव निलये, यात्रा - श्लो.४)

"**प्रतीक्षमाणा शबरी**" इति शीर्षके कवि: चित्रकुरङ्गीकाव्ये उल्लिखिताया: एकस्या: शबर्या: प्रतीक्षाविषये उल्लिखति । श्रीरामचन्द्रस्य प्रतीक्षायां स्थिता शबरी अत्र ऊह्याऽस्ति । विरहवेदनया पीडिताया: शबर्या: अनुभूति: दग्धा इति कविना उच्यते । तस्या: अतीतकालस्य स्मृति: स्निग्धवेणीरूपेण कल्पिता हस्ताद् भ्रंशति, कदाचित् व्यालवत् मुहुर्दंशति । तरङ्गशून्यं वनं घनजघनवत्कल्प्यते । तत्र स्थितस्य एकस्य वृक्षस्याध: कश्चन कृकलास: चातकरूपेण वृक्षोपरि स्थितस्य क्लान्तकुण्डलायिताजगरस्य स्वेदजलं पिबतीति साङ्केतिकरूपेण कवि: नायिकाया: काम-दग्धशृङ्गारचित्रमुपस्थापयति । कदाचित् प्रतीक्षमाणा सा शबरी मध्याह्नकालस्य मरीचिमालायां शीतलच्छायस्य चन्द्रस्य चन्द्रिकामन्विषति यदन्वेषणं सर्वथा असम्भवमेव । पुनश्च कविस्तां शबरीं भूचणक्षेत्रबालया सह उपमाति । भूक्षेत्रे भूचणसंग्रहावसरे मध्याह्नकाले तस्या: बालाया: कृते शय्यान्वेषणं यथा वृथा भवति, तथैव शबर्या: अन्वेषणमपि मुधा इति चिन्त्यते । नदीवेगस्य कारणं ज्ञातुं प्रयत्न:, सिकतासु तैलान्वेषणाय कृत: प्रयास: यथा वृथा भवति, तथैव शबर्या: प्रेमान्वेषणं वृथा इति कविनोपस्थाप्यते । कवे: अपूर्वाऽनुचिन्ता वृथान्वेषणस्य विषये एषाऽपि भवति —

अङ्गुलीपरिमिते स्रोतसि क: द्रवीभूतभयादाशापोतं
प्लावयति सागरं लङ्घितुम् ? उत्प्लाविते स्रोतसि य:
निश्चेष्ट: स्वपिति स: नेत्रजले प्लावयेद्वा पोतम् ? ।।

(तव निलये, प्रतीक्षमाणा शबरी - ५,६)

कोऽपि अङ्गुलीपरिमिते स्रोतसि पोतं चालयितुं समर्थो न भवति, न च उत्प्लाविते स्रोतसि स्थित्वा नेत्रजले तं पोतं चालयितुं समर्थो स्यात् । एतत्सर्वं वृथाप्रयासमात्रमेव । शबर्याः स्थितिरपि तादृश्यासीत् । परन्तु कदाचिद् राम आगमिष्यतीति आशया तत्पदचिह्नं प्रतीक्ष्य वर्तते। रामे समागमे च सा गद्गदप्राणा प्रफुल्लचेतसा मुक्तिं लभते । प्रणयस्य स्वादं प्राप्नोति इति कवेरनुचिन्ता श्लाघनीयैव ।

"**मनोरमा**" इति शीर्षके एकस्याः विरहिण्याः सुन्दरीरमण्याः वेदनायाः चित्रं कविनोपस्थाप्यते । तस्याः वेदनायां कोऽपि सान्त्वनां दातुं नास्ति । प्रत्यहं कुञ्जरमणी, रङ्गलासिनी इदानीं विरहे पीडिताऽस्ति । चलायमानभूपृष्ठे चलन्त्याः तस्याः आरम्भः कुत्र, अन्तश्च कुत्र इति न ज्ञायते । तस्याः पुनरुक्तिः गुणायते, विदग्धता दोषायते । मौनता दुःखायते । व्याकुलता गुणायते । कदाचित् सा अतिभाषते, तेन तदतिभाषणं वेदनामतिक्रामति । एषा भवती मनोरमा ।

"**मञ्जरी**" इति शीर्षके नवयौवनायाः नायिकायाः चित्रमुपस्थाप्य तद्दर्शनोत्सुकस्य कामदग्धस्य कस्यापि पुरुषस्य दुःखप्रशमनहीतायाः वेदनाया वा प्रतिपादनं क्रियते कविवरेण । हिल्लोलित-कल्लोलितः सागरः आकुलितभावेन सह उपमीयते । तत्र विपण्यां निस्तरङ्गे नयनभङ्गे नवीनरङ्गे काऽपि नवमञ्जरी तनुवल्लरी विस्तारिता भवति । सा नायकस्य मानसे उद्भासिता भवति । अत्र नायकस्य मानसं तरुतमालमालतीमालकानेन नीलनीचोलेन नलिनीनालेन तनुतीर्थकेन सह उपमीयते। तन्मञ्जरीदर्शनेन तन्मानसं मन्थितं कण्टकायितं च भवति । लौल्ये तस्मिन् चित्तविभ्रमे हृदयस्य गह्वरान्धकारपटले दुःखस्य लेहनमनुभूयते । कवेर्भाषया —

तरुतमाले मालतीमालकानने
नीलनीचोले नलिनीनाले कण्टके,
तनुतीर्थके मन्मन्थिते मानसे
नवोन्मेषके परिवेषिते भासते ।
लौल्ये चित्तविभ्रमे
हृद्गह्वरान्धकारपटले लेलिह्यते
शिवकलितस्य जनस्य
दुःखं न शाम्यति ।। (तव निलये, मञ्जरी - २-३)

एवं प्रकारेण आधुनिककवेः प्रफुल्लचन्द्रमिश्रमहोदयस्य तवनियलये इति शीर्षकोपेते काव्यकदम्बे तदीयमनोवेगस्य हृदयस्पन्दनस्य निरलसशब्दशम्भारैस्सह भावाः अवश्यमेव सकलसहृदयहृदय-रञ्जकाः भवन्तीत्यत्र नास्ति सन्देहः ।

—— ० ——